University of Mysore

Oriental Library Publications

मैसूरु प्राच्यकोशागारस्थ

लिखितसंस्कृतग्रन्थसूची

सविवरणा

द्वितीयसम्पुटम्—धर्मशास्त्रम् (स्मृतिः)

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

Government Oriental Library, Mysore

BY

H. R. RANGASWAMI IYENGAR, Esq., M.A.,

Curator in-charge, Government Oriental Library, Mysore

AND

VIDVAN T. T. SRINIVASAGOPALACHAR,

Pandit, Govt. Oriental Library, Mysore

VOL. II—Dharmaśāstra (Smṛtis)

MYSORE:
PRINTED BY THE ASST. SUPDT. AT THE GOVT. BRANCH PRESS
1944

PREFACE

THIS forms the second of the several volumes of the Descriptive Catalogue of Sanskrit Manuscripts in the Mysore Oriental Library planned for publication. The first volume containing descriptions of 686 works relating to Vedic literature was published in 1937. The present volume comprises descriptions of 175 manuscripts of Smṛti literature almost on the same plan as was adopted in the previous volume. For the convenience of readers, alphabetical index of the works noticed and of their authors has been added at the end. The unpublished works have been indicated by an asterisk mark placed against them.

The word "Smṛti" in Sanskrit literature is used in two senses. It is used in a wider sense, in contrast with "Śruti", to comprehend all works other than the Vedic Samhitas, Brāhmaṇas and the Upanishads. In this sense Grammar, Prosody, Astronomy and Astrology, Itihāsa, Purāṇa and Dharma Śāstra are Smṛtis. It is also used in a restricted sense to mean only the original works on Dharma ascribed to Ṛṣis or Sages like Atri, Āśvalāyana, Bhṛgu and Bharadvāja. There is no consensus of opinion among the smṛtikāras themselves about the number of seers, who wrote the original smṛtis. Thus Baudhāyana names seven, Apastamba ten, while Manu names only six. According to a Sūtra of Gautama, the authors of Dharmasūtras are 16. Yājñavalkya refers to 20 expounders of Dharma. Paithinasi, a later writer, enumerates 36. The author of the Prayōga Pārijāta, however, enumerates 18 writers of Smṛti, 18 of Upasmṛti and 21 other Smṛtikāras like Vasiṣṭha. There is, therefore, no definiteness regarding the number of original Smṛtis and in many cases there are Laghu, Bṛhat or Vṛddha forms of the same text. This might suggest,

that there was successive redaction of original sūtras, the compilers drawing largely on the floating mass of Smṛti material and the changing customs.

Among the works noticed in this volume, special attention may be drawn to two. One of them is the Vyāsa Smṛti described under No. 145. In the colophon at the end of the work, it is stated to be the Uttarakānda of the Vyāsa Smṛti. The work describes the duties enjoined on a Sri Vaisṇava, particularly of the Tenkalai or the Southern School. The other work noticed under No. 62 is the Laghuhita Dharma, which is a commentary on the Smṛti of Parāśara by one Kāmēśvara Sōmayāji. In the colophon at the end of the work, which runs as follows, the author gives his pedigree :—

श्रीहेम्मसूरिकुलजलधिसुधानिधिचिद्रूपयज्वप्रपौत्रस्य यज्ञेश्वरयज्वपौत्रस्य प्रतिवसन्तसोमयाजिनः पुत्रस्य कामेश्वरवसन्तसोमयाजिनः कृतौ etc.

He seems to hold very liberal views on social matters in that he boldly interprets the oft quoted stanza,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

(पराशरस्मृतिः IV 30)

to give express sanction for widow-marriage. He is undoubtedly later than the commentator, Mādhavācārya to whom he refers in the body of the work. He is also said to have written another voluminous commentary on the same work under the title "Guruhita Dharma".

MYSORE, 22-11-1944.

H. R. RANGASWAMY IYENGAR,
Curator-in-charge, Oriental Library, Mysore.

॥ श्रीः ॥

प्रस्तावना

—

अयि सहृदयाः प्राचीनप्रबन्धान्वेषणकौतुकिन आर्यमिश्राः—समुचितमिदानीमनुचिन्तनीयमेवैतत्, यत्किल ज्ञानं नामानुपमं पावनम्, तच्च विशेषतः कलिबलकलुषितशेमुषीकाणामिति ।

तच्च ज्ञानं गुरुसकाशादुपलब्धमपि बहुविधप्रबन्धपरिशीलनैनेवाभिवर्धनीयम् । प्रबन्धपरिशीलनं च तत्तत्कोशसंग्रहायत्तमितीदानीं बहुषु जनपदेषु बहवो ग्रन्थास्तत्रतत्र कोशालयेषु बुभुत्सुजनानामवबोधाय ततइतस्समुच्चित्य संगृह्य स्थापिताः पुत्रिकाकरणादिना परिरक्ष्यन्ते, मुद्रापणादिना प्रकाश्यन्ते च ।

तथैवास्यां पण्डितप्रकाण्डपरिमण्डितायां महीशूरराजधान्यामपि श्रीमन्महीशूरजनपदविश्वविद्यालयानुबन्धिन्यनुदिनसमेधमानेऽस्मिन् राजकायप्राच्यकोशालये संगृहीता नैकविधलिपिविभूषिता विविधश्रुतिस्मृतीतिहासपुराणकाव्यशास्त्रकलाशिल्पागमादिप्राच्यप्रबन्धकल्पशाखिनः प्राचीनदार्शनिकादिविषयगवेषणकौतुकिनां मनोरथमापूरयन्तो विराजन्ते ।

तदत्र संगृहीतानां ग्रन्थानां नामधेयादिनिर्देशमात्रपरिकलितपुस्तकसूचनीप्रकाशनं तत्तद्ग्रन्थगतविषयगवेषणपराणां विना प्रयासं द्रुततरसाहाय्याय नोपकल्पत इत्यधुना तत्तद्ग्रन्थोपक्रमोपसंहारग्रन्थभागनिर्देश—तत्तद्ग्रन्थप्रतिपाद्यसारसंग्रह —यावदुपलब्धतत्तद्ग्रन्थानुबन्धिकर्त्रादिविषयाविवेचनापुरस्सरीयमत्रत्यलिखितसंस्कृतग्रन्थानां सविवरणसूचनी मुद्रणपथमनीयत ।

तत्र च पूर्वं प्रकाशिते संपुटे संहिताब्राह्मणारण्यकोपनिषन्मन्त्रसंग्रहात्मकावान्तरकक्ष्यापरिकर्मितानां वेदग्रन्थानां सविवरणसूचनी प्राकाशि ।

तदधुनाऽस्मिन् द्वितीये संपुटे आर्षाणां स्मृतिग्रन्थानां सविवरण-सूचनी प्रकाश्यते ।

इदमिदानीं प्रसक्तं स्मृतिप्रबन्धमधिकृत्य किञ्चित् प्रस्तूयते—

न कश्चिद्वेदकर्ता च वेदं श्रुत्वा चतुर्मुखः ।
तथैव धर्मान् स्मरति मनुः कल्पान्तरेन्तरे ॥ (पराशरस्मृतिः १-२१)

इति पराशरस्मरणेन चतुर्मुखो महाकल्पे परब्रह्मणोपदिष्टं वेदगणं धृत्वा तत्र विप्रकीर्णान् वर्णाश्रमादिधर्मान् स्मरति । तदनु स्वायंभुवो मनुः प्रत्यवान्तर-कल्पं तानेव धर्मान् स्मरति । तदनु च तथैवात्र्यादयोऽपि महर्षयः ।

अत्राह याज्ञवल्क्यमहर्षिः—

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती ॥
पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥

(याज्ञवल्क्यस्मृतिः १, ३–४)

इति । अत्र विज्ञानेश्वरप्रणीतायामेतद्व्याख्यायां मिताक्षरायां "नेयं परिसङ्ख्या, प्रदर्शनार्थमेतत्, तेन बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम्" इत्युक्तम् । अत एव—

तेषां मन्वङ्गिरोव्यासगौतमात्र्युशनोयमाः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्णवापस्तम्बहारीताः शङ्खः कात्यायना भृगुः ।
प्रचेता नारदो योगी बोधायनपितामहौ ॥
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च ।
सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजनिस्तथा ॥

जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसंभवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयस्तथा ॥

इति पैठीनसिना स्मर्तारः षट्त्रिंशदृषयः प्रदर्शिताः ।

तथा—

तान्यालोच्य महाबाहो तथा स्मृत्यन्तरेषु च ।
मन्वादिस्मृतयो याश्च षट्त्रिंशत्परिकीर्तिताः ॥

इति भविष्यत्पुराणे षट्त्रिंशत्स्मृतिभिन्नस्मृत्यन्तराभिधानात् षट्त्रिंशतोऽन्येपि केचन स्मर्तार इति ज्ञायते ।

प्रयोगपारिजाते तु मन्वादीनष्टादश धर्मशास्त्रप्रवर्तकान् परिगणय्य तत उपस्मृतिकर्तॄन् जाबाल्यादीनष्टादश निर्दिश्य वसिष्ठादयोऽन्येऽप्येकाविंशतिः स्मर्तार उपात्ता दृश्यन्ते ।

योगियाज्ञवल्क्य-वृद्धमनु-वृद्धशातातप-वृद्धवसिष्ठ-लघुहारीतादिनाम्नोपलभ्यमानाः स्मृतयस्तु तत्तदवस्थाभेदेन तैस्तैरेव याज्ञवल्क्यादिभिः प्रणीताः स्युरिति मित्रमिश्रैरभिहितम् ।

तथा धर्मशास्त्रनिबन्धेषु तत्र तत्रानिर्दिश्यैव स्मर्तृनामधेयं 'अत्र स्मृतिः' इत्याद्यभिधानं, स्मृतिनामस्मर्तृनामोल्लेखपूर्वकमुपात्तानामपि केषांचिद्वचनानां तत्तन्नाम्नेदानीमुपलभ्यमानासु स्मृतिष्वनुपलम्भश्च परिदृश्यते। ततश्चेदमवगम्यते वेदवत्स्मृतिप्रवाहस्याप्यनन्ततया यथोपलम्भं यथाप्रामाणिकनिबन्धृपरिग्रहं चेदानीं स्मृतीनां तदीयवचनानां च प्रामाण्यमुररीकरणीयमिति ॥

सेयं स्मृतिः दृष्टार्था, अदृष्टार्था, उभयार्था, न्यायमूला, आनुवादिकी चेति पाञ्चविध्यमापन्नेति—

दृष्टार्था तु स्मृतिः काचिददृष्टार्था तथाऽपरा ।
दृष्टादृष्टार्थरूपाऽन्या न्यायमूला तथाऽपरा ॥

अनुवादस्मृतिस्त्वन्या शिष्टैर्दृष्टा तु पञ्चमी ॥

इति भविष्यत्पुराणेऽभिधानात् इति मित्रमिश्रः । आसामुदाहरणमपि भविष्यत्पुराण एव सुव्यक्तम् ।

तास्वेतासु स्मृतिषु काश्चन स्मृतयोऽद्य मोहमयीपुण्यपत्तनकलकत्ता-मद्रपुर्यादिषु मुद्रिता उपलभ्यन्ते । तत्तन्नामभिर्मुद्रिताभिस्ताभिस्सहात्रत्य-लिखितानां संवाचने तत्र तत्र बहवः पाठभेदाः ग्रन्थन्यूनाधिकभावः क्वचिन्ना-ममात्रसादृश्यं ग्रन्थतो वैसादृश्यं चेत्यादिकमुपलभ्यते । तदिदं सर्वं तत्तत्स्मृति-निर्देशप्रदेशेष्वेव निरूपितं द्रष्टव्यम् ।

अमुद्रिता अपि काश्चन स्मृतयोऽत्र कोशालये परिदृश्यन्ते । ताश्च तत्तन्नामनिर्देशतः पूर्वं *ईदृशपुष्पचिह्नेनाङ्किता द्रष्टव्याः । ताश्च प्रायशो मुद्रितस्मृतिषु दृश्यमानरीत्या आह्निकाचारप्रायश्चित्ताद्यभिधानपरास्तत्र तत्र किञ्चिद्विशेषसंसूचनपरा एव दृश्यन्ते । क्वचित्तु परं तद्वैलक्षण्यं परि-दृश्यते । तदिदं दिङ्मात्रप्रदर्शनाय किञ्चिदत्र संसूच्यते—

(पु. सं. १७९ नं. १४५ व्यासस्मृतिः)

कोशेऽस्मिन् व्यासस्मृतिरिति काचनामुद्रिता स्मृतिरुपलभ्यते । स्मृति-रियमत्र कोशे व्यासस्मृतेरुत्तरखण्डरूपेति निरदेशि । कीदृशोऽस्याः पूर्वखण्ड इति तु न ज्ञायते । अध्यायत्रितयपरिमितायामस्यां श्रीवैष्णवस्त्रीपुरुषाणां धर्माचारास्संगृहीता दृश्यन्ते । परं त्वत्र विशेषः—श्रीवैष्णवेषु दक्षिणकला-संप्रदायानुरोध्यूर्ध्वपुण्ड्रधारणक्रमः, स्त्रीणामष्टाक्षरोपदेशे प्रणवपूर्वकत्वं, गृहार्चा-विधौ घण्टानादनिषेधः, वैश्वदेवाग्रयाधानमहालयश्राद्धादीनां काम्यत्वेन तदनुष्ठानप्रतिषेधः, वैधव्यमापन्नानां श्रीवैष्णवस्त्रीणां वपननिषेध इत्यादिः । इदमन्यदप्यत्र परिदृश्यमानं श्रीरामनृसिंहजयन्त्यो रात्रावपि पित्रादीनां प्रत्या-ब्दिकश्राद्धविधानं कं वा संप्रदायमनुरुध्य प्रवृत्तमिति परिचिन्तनीयमिति ।

(पु. सं ७३ नं. ६२ पराशरस्मृतिव्याख्या लघुहितधर्माख्या)

कामेश्वरवसन्तसोमयाजिनाम्ना केन चिद्विदुषा प्रणीतेयं व्याख्या ।

अयं च व्याख्याता वैद्यनाथदीक्षितनामोत्कीर्तनात्ततोऽर्वाचीनो माधवाचार्यव्याख्यां तत्र तत्रोदाहरन्नपि क्वचित्क्वचित् तदननुमतमप्यर्थं स्वमनीषिकयैव साधयति । यथा—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।

पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ (पराशरस्मृतिः, ४–३०).

इतीदं चतुर्थाध्याये पाराशरं वचनम् । अत्र 'विधीयते' इत्यस्य स्थाने लिखितकोशान्तरे 'न विद्यते' इति पाठान्तरं दृश्यत इति संशोधकेन वामनशर्मणाऽभिहितं दृश्यते । अत एव पराशरमहर्षिः गतभर्तृकायाः पत्यन्तरानुबन्धमभिप्रयन् तस्या ब्रह्मचर्यादिकमव्यवधानेनोत्तरत्र प्रशंसति । विधीयते ' इति पाठेऽपि 'अयं च पुनरुद्वाहो युगान्तराविषयः' इति माधवार्याणां द्वितीयाध्याये विवाहप्रकरणेऽत्र च सुस्पष्टोक्तिः परिदृश्यते । एवमप्ययं व्याख्याता कामेश्वरः तामिमां सुस्पष्टोक्तिमन्यथा संभाव्य पतिनाशमरणादौ स्त्रीणां कलावपि पुनरुद्वाहाभ्यनुज्ञापकमिदं पाराशरं वचनमिति व्याकरोति । एवं—

रजसा शुध्यते नारी विकलं या न गच्छति । (पराशरस्मृतिः ७–२).

इतीदमपि सप्तमेऽध्याये पाराशरं वचनम् । अत्र माधवार्यैः स्त्रीणां कायिकातिचारप्रसङ्गे अभ्यासानभ्यासभेदेन प्रचेतःप्रभृतिप्रोक्तं प्रायश्चित्तं प्रतिपाद्य 'रजसा स्त्री मनोदुष्टा' इति मानववचनैककण्ठ्येन पाराशरमिदं वचनं मानसिकातिचारपरमिति निगमने कृतेऽप्ययं व्याख्याता कामेश्वरः अनभ्यस्तकायिकातिचारपरमिदं वचनमित्यभिमन्यत इति ॥

एवमन्यदपि वक्तव्यं अमुद्रिततत्तद्ग्रन्थानिर्देशप्रदेशेष्वेव द्रष्टव्यमिति विस्तरभिया विरम्यत इत्यावेदयति—

सहृदयविद्वद्वंशवदः

मैसूरु,
२२–११–४४.

तिरु. तिरु. श्रीनिवासगोपालाचार्यः

महीशूरपुरराजकीयप्राच्यकोशालयपण्डितः

A DESCRIPTIVE CATALOGUE OF SANSKRIT MANUSCRIPTS IN THE GOVERNMENT ORIENTAL LIBRARY, MYSORE.

मैसूरु राजकीय प्राच्यकोशागारस्थ लिखित-संस्कृतग्रन्थसूची सविवरणा.

धर्मशास्त्रम्—(१) स्मृतिः

Dharma Sastra—(A) Smrti.

No. 1 (3154/6).

आङ्गिरसस्मृतिः.

Āṅgirasa Smṛtiḥ.

Author—Sage Āṅgīras.
Substance—Palm-leaf.
14¾ × 1½ inches.
Character—Grantha.
Folios—32-38.
Lines on a page—8.
Letters in a line—52.
Age of Ms.—Old.
Condition—Good.

Acquired or transcribed—Acquired.
Complete or incomplete—Complete in 275 verses, without division into chapters.
Correct or incorrect—Not so very correct.

Beginning:—

धर्मजिज्ञासुभिस्सम्यगमितौजा महाद्युतिः ।
भरद्वाजादिभिः पृष्टः प्राब्रवीदेतदङ्गिराः ॥
आश्रमेषु च सर्वेषु वर्णानामनुपूर्वशः ।
प्रायश्चित्तविधिं कृत्स्नं वक्ष्यमाणं निबोधत ॥

अन्त्यानामविशेषेण जग्ध्वाऽन्नं हि द्विजन्मनाम् ।
चान्द्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां स्मृतम् ॥

End:—

सर्वव्रतेषु निर्दिष्टं पश्चात्सूतकिनां भवेत् ।
चीर्णव्रते तु निर्दिष्टं पश्चाद्ब्राह्मणभोजनम् ॥
अधीते य इदं शास्त्रमुक्तमङ्गिरसा स्वयम् ।
ऋषीणां सन्निधौ विप्रस्सर्वपापैः प्रमुच्यते ॥

Colophon:—

आङ्गिरसस्मृतिस्समाप्ता ॥

Subject:—

Deals with expiatory and purificatory rites for various unholy or irreligious acts, such as taking in polluted food and drink, eating the flesh of birds prohibited, touching polluted articles, etc.

प्रतिपाद्यविषयः—

स्मृतावस्यां अभोज्यभोजनापेयपानास्पृश्यस्पर्शनादिषु प्रायश्चित्तम्, रजस्वलाशुद्धिः, कांस्यादिद्रव्यशुद्धिः, जननमरणयोश्शुद्धिकालश्चेत्यादिकं निरूप्यते ॥

Noteworthy Features.—This version agrees with the one published under "Smṛtīnām Samuccayaḥ" in the Ānandāśrama Series, but differs to a great extent, from that published in Calcutta and Bombay. A manuscript copy of the work deposited in the India Office Library seems to agree with the present copy. (*vide* India Office Library Catalogue, No. 5326).

वक्तव्यविशेषः—

इयं स्मृतिरानन्दाश्रमग्रन्थमालायां मुद्रितोपलभ्यते । नाम्नैव-केवलमेतत्समाना प्रायः प्रतिपाद्यग्रन्थानुपूर्व्यादिभिर्विलक्षणा प्राधान्यतः श्राद्धविधिनियमप्रतिपादनपरपूर्वभागेन एतद्विलक्षणप्रायश्चित्तनिरूपणपरोत्तरभागेन च सहिताऽन्या स्मृतिरस्मिन् कोशालये (No. 2 कोशः) दृश्यते ॥

No. 2 (A 137/1).

* आङ्गिरसस्मृतिः.

* Āṅgirasa Smṛtiḥ.

Author—Sage Āṅgiras.
Substance—Paper.
Size—$12\frac{3}{4}\times8$ inches.
Character—Telugu.
Folios—1-158 Pages.
Lines on a page—16.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.
Correct or incorrect–Correct.

Beginning :—

पावकप्रतिमं साक्षान्मुनिमाङ्गिरसं द्विजाः ।
ब्रूहि धर्मानशेषान्न इत्यूचुः प्रणिपत्य तम् ॥
तेभ्यस्स तु ततः प्रीत्या श्रृणुध्वमिति चाफणत् ।
वक्ष्मि तानखिलान् धर्मान् वैदिकान् मुक्तये परान् ॥
धर्मस्स्याच्चोदनाप्रोक्तः तदन्यस्तूपचारतः ।
लिङादिरूपा सा ज्ञेया मुक्तिदा श्रुतिचोदिता ॥
श्रुत्युक्तलिङ्लोट्तव्यप्रत्ययलक्षणलक्षिता ।
चोदना सैव नान्या सा पुराणस्मृतिचोदिता ॥
न वैदिकः पुराणोक्तैः कर्माणि मुनिभिश्चरेत् ।
वेदोक्तैरेव तन्मन्त्रैः निखिलानि समाचरेत् ॥
कर्ममध्ये पुराणोक्तमन्त्रोच्चारणमात्रतः ।
नश्येत्तु वैदिकं ध्र(क)र्मं तस्मात्तु न तथाऽऽचरेत् ॥

End:—

कालस्य तु यथोक्तस्य ब्राह्मणस्तत्र कारणम् ।
ब्राह्मणा एव च क्षेत्रं ब्राह्मणा एव दैवतम् ॥
ब्राह्मणानां प्रसादेन सूर्यो दिवि विराजते ।
न ब्राह्मणसमं क्षेत्रं न ब्राह्मणसमोऽनलः ॥
विधिर्न ब्राह्मणादूर्ध्वं न दैवं ब्राह्मणात् परम् ।
जपतां जुह्वतां चैव यच्छतां च सतामपि ॥
क्षेत्राग्नेस्तु सुसम्भूतो ब्राह्मणोऽद्य विशिष्यते ।

न स्कन्दते न व्यथते न विनश्यति कर्हिचित् ॥
वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् ।
देवतापितृभूतानां काचिद्भवति कस्यचित् ॥
ब्राह्मणो देवतास्सर्वास्स च सर्वस्य देवता ।
यो हि यां देवतामिच्छेदाराधयितुमव्ययम् ॥
सर्वोपायप्रयत्नेन तोषयेद्ब्राह्मणान् सदा ॥
समस्तसम्पत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

Colophon:—

इत्याङ्गिरसधर्मशास्त्रे कृच्छ्रकथनं नाम
द्वादशोऽध्यायः ॥

Subjeet:—

This is in two parts, the first part dealing with the nature of Dharma, the efficacy of the Vedic mantras, the importance of wearing the tuft of hair and the sacred thread for a Brahmin and the nature and necessity of performing various kinds of Śrāddhas. The other part known as the 'Uttara Āngiras' consists of 12 chapters and describes the constitution and the sittings of the Assembly (परिषत्) of people learned in law to decide the Prāyascittas for various sins.

प्रतिपाद्यविषयः—

पूर्वोत्तरभागद्वयेन विभक्तायामस्यामाङ्गिरसस्मृतौ पूर्वभागे—धर्मलक्षणं, वैदिकमन्त्रप्राबल्यं, तत्रापि व्याहृतेराधिकं माहात्म्यं, कर्ममध्ये आशौचसम्भवे विधिः, आशोचे नियमः, ब्राह्मणस्य शिखायज्ञोपवीतधारणनियमः, विघ्निते श्राद्धे आतद्विधानं भार्योपगमननिषेधः, लाजहोमादिभ्यः पूर्वं कन्याया रजसि प्रायश्चित्तविधानं, और्ध्वदैहिकाकरणे दोषः, जीवत्पितृककर्तृकश्राद्धक्रमः, संन्यस्तपितृमरणे कर्तव्यक्रमः, स्वीकर्तृव्यतिरिक्तगौणमातापित्रोरर्थलोभादिना मातृत्वाद्यध्यवसायपूर्वककर्मनिषेधः, मुख्यकर्तुः सांनिध्येऽन्यस्यानाधिकारः, बहुविप्रानुमतस्यावश्यकर्तव्यत्वं, मृताद्यपरित्यागे स्नानमहिमानुवर्णनपूर्वकं पुण्यनदीस्नानादिप्रायश्चित्तं, पुंश्चलीप्रायश्चित्तं, तत्साङ्गिनः विधवोपयन्तुश्च प्रायश्चित्तं, स्त्रियाः प्रविष्टान्यकायेन स्वपतिनाऽपि संयोगनिषेधः, देवा-

यात्रादिनिवेदनविधिः, अभ्यञ्जनायोग्यकालः, क्षुरकर्मनिमित्तस्नानादनन्तरं पुनः स्नानावश्यकता, कर्मादौ तात्कालिकतिथ्यादिसंकल्पवाक्योच्चारणावश्यकत्वं, पित्रोः मृताहश्राद्धस्य अन्नेनैव कार्यत्वं, चाक्रिकायनभेदेन ग्रहणद्वैविध्यं, तत्काले भोजनविषयः, असगोत्रदत्तानिन्दनं, सगोत्रदत्तप्रशंसनं, दत्तभेदाः, पुत्रस्वीकाराधिकारिकालादि, दौहित्रस्वीकृत्यभ्यनुज्ञा, प्रथमोढाया एव धर्मपत्नीत्वं, तत्पुत्रस्यैव ज्येष्ठत्वं च, श्राद्धयोग्यसर्वशाकप्रतिनिधित्वेन पनसशाकस्य प्रशंसनं, षण्णवतिश्राद्धानि, तथाऽष्टोत्तरश्राद्धानि च, दर्शक्षयाहश्राद्धप्रशंसा, श्राद्धे निमन्त्रणीयाविप्राः, श्राद्धानुष्ठानप्रयोगः, नदीनां रजोदोषः, श्राद्धविघ्नादौ विधिः, कर्मभ्रष्टपितृश्राद्धप्रकारः, श्राद्धकरणावश्यकत्वमित्येनत्सर्वं प्रपञ्चयते ॥

द्वादशभिरध्यायैर्विभक्ते उत्तरस्मिन् भागे–परिषत्स्वरूपतदुपस्थानतल्लक्षणनिरूपणपूर्वकं प्रायश्चित्तरूपकृच्छ्रादिनिरूपणाशिरस्कं च तत्तत्पातकप्रायश्चित्तानि संगृह्यन्ते ॥

Noteworthy Features—Though this work is identical in name with that described above, it is entirely different from it in content and seems to agree with those described in the Descriptive Catalogue of the Madras Mss. Library and the India Office Library. (*Vide* No. 2611, 2614, Madras; 5327, 5328. India Office Catalogue). The contents of the first part of the work are not to be found in the printed editions of the Āṅgirasa Smṛti and though the Prāyascittas treated in the Second part of the work are also to be found in the printed edition, the arrangement is entirely different and only some of the Prāyascittas described in the printed edition, are here found to be briefly stated.

वक्तव्यविशेषः—

इयं चाङ्गिरसस्मृतिः मुद्रितैतन्नामकस्मृतितो विलक्षणा दृश्यते। मुद्रितायामेतत्समाननामायां स्मृतौ एतत्पूर्वभागपरिदृश्यमानविषया न दृश्यन्ते। एतदुत्तरभागपरिदृश्यमानप्रायाश्चित्तविषयाणां मुद्रितस्मृतौ दर्शनेऽपि ततोऽत्र महत्तरमानुपूर्वीवैसादृश्यं तत्र परिदृश्यमानप्रायश्चित्तेषु केषांचिदेवात्र संग्रहश्च परिदृश्यते ॥

No. 3 (A 669/7).

* आङ्गिरसस्मृतिः.

*Āṅgirasa Smṛtiḥ.

Author—Sage Āṅgiras.
Substance—Paper.
Size—13 × 8⅝ inches.
Character—Telugu.
Folios—16–48.
Lines on a page—25.
Letters in a line—26.
Age of MS—Old.
Condition of MS—Good.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.
Part I.
Correct or incorrect—Incorrect.

Beginning, end and colophon—Same as No. 2.

Noteworthy Features.—This is named as *Pūrvāṅgiras* and is the first part of the work described under No. 2.

No. 4 (4487/3).

* आङ्गिरसस्मृतिः.

*Āṅgirasa Smṛitiḥ.

Author—Āṅgiras.
Substance—Palm-leaf.
Size—10 × 2 inches.
Character—Nāgarī.
Folios—3–11.
Lines on a page—11.
Letters in a line—44.
Age of MS—Old.
Condition of MS—Good.
Acquired or transcribed—Acquired.
Part II.
Complete or incomplete—Complete.
Correct or incorrect—Not so very correct.

Beginning, end and colophon—As in No. 2.

Noteworthy Features.—This is known as Uttarāṅgiras and is the same as the second part of the work described under No. 2.

No. 5 (A 136/7)

आत्रेयस्मृतिः.

Âtrēya Smṛtiḥ.

Author—Sage Atri.
Substance—Paper.
Szie—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—43-49.
Lines on a page—20.
Letters in a line—16.
Age of Ms.—Old.

Condition of Ms.—Good.
Acquire or transcribed—
Acquired.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete in five chapters.

Beginning :—

हुताग्निहोत्रमासीनमत्रिं श्रुतिमतां वरम् ।
अपृच्छंस्ते समागत्य ऋषयस्संशितव्रताः ॥
केन दानेन जप्येन भगवन्नियमेन च ।
शुध्यन्ति पातकैर्युक्तास्तद्ब्रूहि त्वं महामुने ॥

अत्रिः—

अविख्यापितदोषाणां पापानां महतां तथा ।
सर्वेषां चोपपापानां शुद्धिं वक्ष्यामि तत्त्वतः ॥

End :—

चन्द्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः ।
अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनि ॥
यस्यैव जन्मनक्षत्रे ग्रसितौ शशिभास्करौ ।
व्याधिः प्रवासो मृत्युश्च दुरितं च भवेद्भयम् ॥
तस्माद्दाेश्च (दानं च) होमं च देवार्चनजपांस्तथा ।
कुर्यात्तस्मिन् दिने तस्य तेन शान्तिर्भविष्यति ॥
सर्वं गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ।
सोमेऽप्येवं समं तोयं नद्यां स्नानं समाचरेत् ॥

Cokophon :—

इत्यात्रेयधर्मशास्त्रं समाप्तम् ॥

Subject :—

This Smṛti is in five chapters and deals with the efficacy of the Prāṇāyāma and the method of performing it. The uttering of the Gāyatrī is described in the first two chapters; the third chapter deals with Adhyayana and gifts; the fourth with certain expiatory rites and the fifth with rules regarding dining, etc.

प्रतिपाद्यविषयः—

पञ्चाध्यायीपरिमितेयं स्मृतिः—तत्र प्रथमद्वितीययोः, प्राणायामस्य गायत्र्यादिमन्त्रजपस्य च विधिः तन्महिमा च निरूप्यते। तृतीये—वेदाध्ययनदानयोः प्रशंसा, चतुर्थे- रहस्यप्रायश्चित्तानि, पञ्चमे—भोजननियमादयः (No. 10 तमकोशेनिर्दिष्टाः) प्रदर्श्यन्ते ॥

Noteworthy Features :—This Smṛti is styled variously as Ātreya Smṛti, Laghvatri Saṁhitā, Vṛddhātri Saṁhitā and has to be distinguished from the work styled Atri Saṁhitā containing 397 verses in Bombay edition, 391 verses in Dutt's edition and 400 verses in the Poona edition. The MS. under reference is identical with the Vṛddhātri Saṁhitā printed in Calcutta and contains only five chapters. It appears to agree with those described under Nos. 5329, 5330, 5332 in the India Office Library Catalogue. The MS. No. 2615 found described in the Descriptive Catalogue of the Sanskrit MSS. Madras, Vol. V. seems to agree with this but contains six chapters, the last one bearing on Ācāra. A MS. copy of this Smṛti bearing No. 5335 found in the India Office Library and the version printed in Poona contain however, nine chapters.

A verse from this Smṛti is quoted in the Dattaka mīmāṁsā, as the first authority on adoption.

वक्तव्यविशेषः—

अत्रादितश्चत्वारोऽध्यायाः परिगणिताः। अन्तिमस्तु पञ्चमतया नोत्कीर्तितः। इयमात्रेयस्मृतिः लघ्वत्रिसंहिता वृद्धात्रिसंहितेति नाम्ना पञ्चमाध्यायमात्रे किञ्चित्किञ्चिद्भिन्नानुपूर्वीका कलकत्तानगरे पृथक्पृथङ्मुद्रिता दृश्यते। इतोऽत्यन्तविलक्षणाऽतीव विस्तीर्णा एतत्स-

माननामधेयाऽन्याऽपि तृतीया तत्रैव मुद्रिता दृश्यते । पुण्यपत्तनमुद्रितायामस्यां बहवः पाठभेदा दृश्यन्ते । तत्र चेयं नवाध्यायीपरिमिता दृश्यते । इदमत्र प्रतिभाति—काचित्कन्यूनाधिकभावपाठभेदमात्रं न नामभेदे प्रयोजकम्, लेखकभेदादिना तत्संभवात् । तस्मादत्यन्तविलक्षणाया विस्तृताया एव वृद्धात्रिस्मृतिरिति नामधेयं युक्तमिति ॥

No. 6 (3154/14).

आत्रेयस्मृतिः.

Ātreya Smṛtiḥ

Author—Sage Atri.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—125–131.
Lines on a page—7.
Letters in a line—50.
Age of Ms.—Old.
Condition of Ms.—Not good.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.
Correct or incorret—Correct.

Beginning and end as in No. 5.

No. 7 (A 669/14).

आत्रेयस्मृतिः.

Ātreya Smṛtiḥ.

Author—Sage Atri.
Substance—Paper.
Size—$13 \times 8\frac{3}{4}$ inches.
Character—Telugu.
Folios—131–133.
Lines on a page—27.
Letters in a line—26.
Age of Ms.—Old.
Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorret—Correct.
Complete or incomplete—Complete.

Beginning and end as in No. 5.

वक्तव्यविशेषः—

कोशेऽस्मिन् पञ्चमाध्यायमात्रं दृश्यते ॥

No. 11 (3534/4).

आत्रेयस्मृतिः.

Ātreya Smṛtiḥ.

Author—Sage Atri.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—214-216.
Lines on a page—8.
Letters in a line—35.
Age of Ms.—Old.

Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.

Beginning, end, colophon and subject—same as in No. 10.

No. 12 (A 137/3).

*आपस्तम्बस्मृतिः

* Āpastamba-Smṛtiḥ.

Author—Āpastamba.
Substance—Paper.
Size—$13\frac{3}{4} \times 8$ inches.
Character—Telugu.
Pages—244-340.
Lines on a page—19.
Letters in a line—16.
Age of Ms.—Old.

Condition of Ms. Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Beginning:—

अध्यात्मज्ञानसम्पन्नमापस्तम्बं महामुनिम् ।
अभिगम्य महात्मानमिदमूचुर्मुनीश्वराः ॥

केनोपायेन भगवन् मनुष्यास्सिद्धिमाप्नुयुः ।
तमुपायं समाचक्ष्व शास्त्राण्यालोच्य तत्त्वतः ॥

End:--

तीर्थश्राद्धे तथा पिण्डान् क्षिपेत्तीर्थे समाहितः ।
दक्षिणाभिमुखा भूत्वा पित्र्यके च प्रकीर्तिता ॥
आधी ? कृच्छ्राणि विंशत्या प्रेत्य तद्दिवसे तदा ।
त्रिशत्कोटी भैरवान्तं गृह्यादारभ्य तादिश ? ॥

Colophon:-

इत्यापस्तम्बधर्मशास्त्रे पञ्चमः पटलः ॥

Subject:—

Is in six sections or paṭalas and deals in detail with Ācāra, or right conduct, śauca or purification of the body, rules regarding Gāyatrī, Brahma-sacrifice and Śrāddha ceremonies.

प्रतिपाद्यविषयः—

प्रथमे निवासदेशपटले—धर्मप्रमाणानि, आचारप्रशंसा, धर्मशास्त्राध्ययनम्, स्मर्तृमुनिनामनिर्देशः, पूर्वापरसूत्रनामानि, निवासार्हदेशः, इत्येते निरूप्यन्ते ।

द्वितीये—ब्राह्ममुहूर्तकर्तव्यम्, मूत्रपुरीषोत्सर्गः, शौचम्, आचमनंदन्तधावनम् इत्येतानि प्रतिपाद्यन्ते ।

तृतीये—स्नानविधिः, स्नानभेदाः, वस्त्रधारणादि, कुशपवित्रादिधारणक्रमः, सन्ध्योपासनं, तत्र गायत्रीजपविधिः इत्येते निरूप्यन्ते ।

चतुर्थे—सविस्तरं गायत्रीजपविधिर्निरूप्यते ।

पञ्चमे—ब्रह्मयज्ञः, औपासनं, दर्पणादिदर्शनं, ब्रह्मर्ष्यादितर्पणं, वस्त्रनिष्पीडनं, वैश्वदेवं, भोजनविधिः, तत्र नियमाः, वर्ज्यान्नादि, भोजनोत्तरकालकर्तव्यम्, इत्येतानि निरूप्यन्ते ।

षष्ठे पटले--श्राद्धविधिः, श्राद्धे वर्ज्या ब्राह्मणाः, श्राद्धार्हाः, श्राद्धार्हधान्यादि, श्राद्धे प्रशस्तक्षेत्राणि, श्राद्धकालाः, तत्करणविधिः इत्येते सविस्तरं निरूप्यन्ते । पटलोऽयमसमग्रो दृश्यते ॥

Noteworthy Features—This is entirely different from the recensions published in Calcutta and Poona. This version appears to agree with that described under No. 5340 in the India Office Library Catalogue. In stanzas 23-39 of the 1st paṭala, there is a reference to the names of other Smṛtis known at that time.

अक्तव्याविशेष:—

कल्कत्तानगरे आनन्दाश्रमे च मुद्रिता आपस्तम्बस्मृतिरितो विभिन्ना दृश्यते ॥

No. 13 (A 669/10)

* आपस्तम्बस्मृतिः.

*Âpastaṁba-Smṛtiḥ.

Author—Sage Âpastaṁba.
Substance—Paper.
Size—$13 \times 8\frac{3}{4}$ inches.
Chaoacter—Telugu.
Folios—68-86.
Lines on a page—25.
Letters in line—24.
Age of Ms.—Old.

Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Beginning and end :—As in No. 12.

No. 14.

आश्वलायनस्मृतिः

Āśvalāyana Smṛtiḥ (C 1).

Author—Sage Āśvalāyana.
Substance—Paper.
Size—$12\frac{3}{4} \times 4\frac{1}{4}$ inches.
Character—Devanāgarī.
Folios—1-158.
Lines on a page—9.
Letters in a line—36.
Age of MS—Old.

Condition—Good.
Acquited or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Beginning :—

ऋषिमेकाग्रमासीनमाश्रमे संशितव्रतम् ।
प्रणम्य शिष्याः पप्रच्छुस्सुधर्मानाश्वलायनम् ॥
श्रोतुमिच्छामहे धर्मानद्भुतान् भवतोदितान् ।
वर्णाश्रमाचारगतानापद्धर्मांश्च कृत्स्नशः ॥
देशजातिकुलश्रेणिकालधर्मांश्च तत्त्वतः ।

End :—

सर्वधर्मनिधे धर्मान् वक्तुमर्हसि नो भवान् ॥
वृषभोत्सर्जनं नाम सर्वयज्ञोत्तमोत्तमम् ।
एतत्कृत्वा विधानेन मुच्यते सर्वपातकैः ॥
ज्ञानाज्ञानकृतैर्मर्त्यैः कोटिजन्मकृतैरपि ।
एतत्सुदुर्लभतरं शिवप्राप्तिकरं नृणाम् ॥
वृषभोत्सर्जनं कर्म वत्सतर्या विना अपि ।

आद्यन्तग्रन्थाः (3125)

Colophon :—

इत्याश्वलायनीये स्मृतिरत्ने धर्मशास्त्रे पञ्चदशोऽध्यायः ॥
आश्वलायनस्मृतिलेखनं समाप्तिमगात् ।

Subject :—

This is in fifteen chapters and gives in detail, information about the creation of the world, the nature of Dharma, the characteristics of the girl to be married, the performance of Prāṇāyāma, Homa, Brahma yajña, the duties of the four castes and of the house-holder and the Vānaprastha, the funeral ceremonies and the sacrifices to the dead.

प्रतिपाद्यविषयः—

अत्र पञ्चदशाध्यायास्सन्ति । तत्र प्रथमेऽध्याये सृष्टिक्रमः, द्वितीये—धर्मस्वरूपप्रमाणलक्षणानि, ब्रह्मचर्यप्रशंसा, उपनयनकालः, अनुपनीतकृत्यं, ब्रह्मचारिनियमाः, अध्येत्रध्ययननियमाश्च, तृतीये—वरणीयकन्याः, कूश्माण्डहोमः, कन्यापरीक्षा, कालनिर्णयः, चतुर्थे प्राणायामजपादिविधिः, गायत्रीध्यानक्रमश्च, पञ्चमे—होमविधिः, ब्रह्मयज्ञविधिः, अध्ययनविधिः, प्रशस्तगर्हितवृत्ती, कुम्भीधान्यादयः, आपद्धर्माः,

पञ्चमहायज्ञाः, वैश्वदेवं, अतिथिपूजा, भोजननियमः, सायंसन्ध्याविधिः, शयनविधिः, ऋतुगमनं च, षष्ठे वानप्रस्थधर्माः, सप्तमे—नान्दीश्राद्धं, पुण्याहं, जीवश्राद्धं, व्याहृतिहोमविधिः, यतिधर्मः, हंसादियतिभेदाः, यतिसंस्कारश्च, अष्टमे—राजधर्माः प्रजापरिपालनादयः, ग्रहयज्ञः, काम्यकर्माणि, नवमे—वैश्यवृत्त्यादि, स्त्रीशूद्रधर्मः, दशमे—सदाचाराः, अन्ये च गृहस्थधर्माः, एकादशे—शास्त्रोपोद्धातः, गर्भाधानादिसंस्काराश्च, उपाकर्मोत्सर्जने, अष्टकान्वष्टकादर्शश्राद्धानि, श्रवणाकर्म, सर्पबलिश्च, द्वादशे—गृह्यानुक्तानि तीर्थस्नानादीनि, अग्निप्रतिष्ठापनादि, त्रयोदशे—श्राद्धविधिः, चतुर्दशे—दहनाद्यौर्ध्वदेहिककर्माणि, पञ्चदशे—द्रव्यशुद्धिः, नारायणबलिविधिः, वृषोत्सर्गविधिश्चेत्येते सविस्तरं निरूप्यन्ते ॥

Noteworthy Features.—This is not found among the Smṛtis printed in Calcutta or Bombay, and appears to differ from the Laghvāśvalāyana Smṛti published in the Ānandāśrama Press in the "Smṛtīnām Samuccayaḥ."

वक्तव्यविशेषः—

मुंबैकल्कत्तानगरयोर्मुद्रितस्मृतिसंग्रहकोशे दृश्यमाना आपस्तम्बस्मृतिरितो विभिन्ना दृश्यते । अत इयं वृद्धाश्वलायनस्मृतिः स्यादित्यभ्यूह्यते ॥

No. 15. (2302)

आश्वलायनस्मृतिः.

Āśvalāyana Smṛtiḥ.

Author—Aśvalāyana.
Substance—Palm-leaf.
Size—$15\frac{1}{5} \times 1\frac{3}{8}$ inches.
Character—Nāgarī.
Folios—1–173.
Lines on a page—4.
Letters in a line—48
Age of MS—Old.

Condition of MS—Good.
Acquired or transcribed—Purchased.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Beginning :—

Same as No. 14.

End :-

अष्टकास्विह यत्नेन तयोरपि च मासयोः ।
तिथिष्वन्यासु चैताभ्यो दानैरन्नैश्च भोजयेत् ॥
सर्वैः कार्याऽष्टका भक्त्या प्रोष्ठपन्माघमासयोः ।
अष्टकां ये न कुर्वन्ति स्वशक्त्या मासयोस्तयोः ॥

Subject :—

Vide No. 14.
कोशेऽस्मिन्नियं स्मृतिरेकादशाध्यायान्त्यभागान्ता दृश्यते ॥

Noteworthy Features.—This Ms contains only 11 chapters of the work described under No 14.

No. 16 (3645).

आश्वलायनस्मृतिः.

Āśvalāyana Smṛtiḥ.

Author—Āśvalāyana.
Substance—Palm-leaf.
Size—17¾×1½ inches.
Character—Nāgari.
Folios—1-62.
Lines on a page—5.
Letters in a line—52.
Age of Ms.—Old.

Condition of Ms.—Not so good.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.

Beginning:—

ते विरूपा दरिद्राश्च भविष्यन्ति भवे भवे ।
तस्मात्सन्तो दरिद्रा ये भक्त्या होमाग्निमप्युत ॥
उत्सृज्य त्वष्टकासिद्ध्यै यवसान् वृषभेषु च ।

पितरस्त्वृषभं वाऽग्निं समाश्रित्याष्टकागणाः ॥
सार्धं वस्वादिभिस्तुष्टास्तस्य दास्यन्ति वाञ्छितम् ॥

End:—

No. 14 कोशवत्.

प्रतिपाद्यविषयः—

No. 14 कोशे द्रष्टव्यः.

Noteworthy Features—This Ms contains the last four chapters of the work described under No. 14.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिरेकादशाध्यायान्तिमभागमारभ्य समग्रा दृश्यते। आहत्य No. 15, 16 कोशद्वयेनेयं स्मृतिस्समग्रा दृश्यते।

No. 17 (A 136/1).

*औशनसस्मृतिः.

*Āuśanasa Smṛtiḥ.

Author—Sage Uśanas.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—1-27.
Lines on a page—19.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.

Beginning:—

ऋषीणां शृण्वतां पूर्वमुशना धर्मतत्त्ववित्।
धर्मार्थकाममोक्षाणां कारणं पापवारकम् ॥
समाहितमना यूयं शृणुध्वं गदतो मम।
भार्गवं पितरं नत्वा प्रवक्ष्यामि समाहितः ॥
कृतोपनयनो वेदानधीयीत द्विजोत्तमः।

गर्भाष्टमे वाऽष्टमे वा ब्राह्मणस्योपनायनम् ॥
स्वसूत्रोक्तविधानेन वेदमार्गविधानतः ॥

End:—

खड्गोपस्तरणादेव पितरोऽत्यन्ततर्पिताः ।
क्षुत्पिपासादिरहिता अनन्तान् वत्सरान्तरान् ॥
आकाङ्क्षमाणा अन्नादीन् सुखिताः स्युस्त्रिविष्टपे ॥
धर्मशास्त्रमिदं पुण्यं चिन्तितार्थप्रदायकम् ।
ये पठन्ति च शृण्वन्ति तेषां सर्वे मनोरथाः ।
फलन्ति सद्यो भूलोके तस्मादेतत्सदा पठेत् ।
शृणुयाद्वा प्रयत्नेन सर्वकार्यार्थसिद्धये ॥

Colophon:—

इत्यौशनसधर्मशास्त्रं समाप्तम् ॥

Subject:—

Deals with the duties of a Brahmacārin and the details of the Śrāddha ceremony.

प्रतिपाद्यविषय:—

पञ्चाध्यायीपरिमितमिदं धर्मशास्त्रं, तत्र प्रथमेऽध्याये—आचार्यादिपादोपसंग्रहणं, भिक्षाचरणं, भोजननियमः, इत्यादयो ब्रह्मचारिधर्मा निरूप्यन्ते । द्वितीयतृतीययोः अध्ययननियमः, अनध्यायः, विस्तरेण भोजनविधिः, दर्शादिश्राद्धानि चेत्येतानि निरूप्यन्ते । चतुर्थे—निमन्त्रणार्हब्राह्मणा निरूप्यन्ते । पञ्चमे—श्राद्धप्रयोगः प्रतिपाद्यते ॥

Noteworthy Features.—This work contains five chapters and in the colophon is said to be complete. The versions of this work as printed in Calcutta editions (Jeevānanda and Dutt) contain chapters, describing contamination, obsequies and Prāyascittams for various sins. The contents of the manuscript of the Library are, except for some variations in readings, identical with the above two editions up to the 27th stanza of the fifth chapter; the remaining verses of the fifth chapter dilate on the importance of

wearing the sacred thread. The Auśanasa Dharmaśāstra printed in Calcutta, Poona and Bombay is entirely different from Auśanasa Smṛti and contains only 51 stanzas and describes the people of the Anuloma and Pratiloma castes and their occupations.

The manuscript of this Library contains large lacunæ at the end of the second, the beginning of the third and the middle of the fifth chapters.

वक्तव्यविशेषः—

कोशेऽस्मिन् परिदृश्यमानेयं स्मृतिः पञ्चमाध्याये 37 पद्यपर्यन्तं मुंबैकल्कत्तनगरयोर्मुद्रितैतत्स्मृतिसमाना दृश्यते। 37 पद्यानन्तरं यावत्पञ्चमाध्यायसमाप्ति यज्ञोपवीतप्रशंसनपरग्रन्थबहुला दृश्यते। पञ्चमाध्यायान्त एवैतत्स्मृतिसमाप्तिस्सूचिता। मुद्रितकोशयोस्तु एतदपेक्षयाऽधिकाश्चत्वारः षष्ठसप्तमाष्टमनवमाध्याया आशौचौर्ध्वदैहिकपातकतत्प्रायश्चित्तनिरूपणपरा दृश्यन्ते। मुंबैकल्कत्तानगरयोरानन्दाश्रमग्रन्थमालायां च औशनसधर्मशास्त्रनाम्ना मुद्रितमेतद्विलक्षणमनुलोमप्रतिलोमजातितद्वृत्तिनिरूपणपरमेकपञ्चाशच्छ्लोकपरिमितमन्यदप्युपलभ्यते ॥

No. 18 (A 669/16).

***औशनसस्मृतिः.**

*Auśanasa Smṛtiḥ.

Author—Sage Uśanas.
Substance—Paper.
Size—13 × 8⅝ inches.
Character—Telugu.
Folios—141-149.
Lines on a page—29.
Letters in line—25.
Age of Ms.—Old.

Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Beginning, End, Colophon, Subject and Noteworthy Features, as in No. 17.

No. 19 (3154/10).

***औशनसस्मृतिः.**

*Auśanasa Smṛtiḥ.

Author—Sage Uśanas.
Substance—Palm-leaf.
Size—14¾ × 11 inches.
Character—Grantha.
Folios—84-96.
Lines on a page—8.
Letters in a line—56.
Age of Ms.—Old.
Condition of Ms.—Not good.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.
Complete or incomplete.—Incomplete.

Beginning :—

शौनकाद्याश्च मुनय औशनं भार्गवं मुनिम्।
नत्वा प्रप्रच्छुरखिलं धर्मशास्त्रविनिर्णयम् ॥

The rest as in No. 17.

End, Colophon and Subject :—*Vide* No. 17.

Noteworthy Features.—The text runs up to the end of the 36th stanza in the fifth chapter.

No. 20 (A 136/9).

***कण्वस्मृतिः.**

*Kaṇva Smṛtiḥ.

Author—Sage Kaṇva
Substance—Paper.
Size—12¾ × 8 inches.
Character—Telugu and Kannada.
Folios—68-108.
Lines on a page—19.
Letters in a line—16.
Age of Ms.—Old.
Condition of Ms.—Good.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Beginning :—

कण्वं गत्वा महाभागा मुनयो ब्रह्मवित्तमम् ।
युगदेशप्रभेदेन सर्वधर्मान् सनातनान् ॥
पप्रच्छुरखिलज्ञत्वै लोकानां हितकाम्यया ।
कण्व वेदविदां श्रेष्ठ सर्वलोकहिताय वै ॥
सर्ववैदिककृत्यानां मुख्यामुख्यं गुणागुणम् ।
प्रविभज्य समासेन सुस्पष्टं कथयस्व नः ॥
मुख्यं कल्पममुख्यं च गौणं काम्यमियत्तमम् ।
एवमेतत्तथा नो चेत् साध्यासाध्ये च तत्परम् ॥
चित्तं सद्यस्तत्र तत्र सङ्ग्रहेण सुविस्तरम् ।
सुस्पष्टं सुलभं तुर्ययोगयोग्यं तथा वद ॥
इति पृष्टो ब्रह्मनिष्ठ इदं प्रोवाच तान् प्रति ।
पृष्टं भवद्भिः परमं रहस्यं स्वर्गसाधनम् ॥
चित्तशुद्धिकरं ब्रह्मज्ञानकारणमद्य वै ।
न शक्यतेऽन्यैरेतद्धि वक्तुं श्रोतुं च कैश्चन ॥
अथापि वः प्रवक्ष्यामि धर्मसारं श्रुतीरितम् ।
मुख्यामुख्यं विभज्यैव चित्तपूर्वं द्विजोत्तमाः ॥
क्रिया कर्ता कारयिता करणं तत्फलं हविः ।
बुद्धिरीश्वर एवेति सर्वं यस्य सदा स्थिरा ॥
स एव कृतकृत्यो हि स तु ज्ञानस्य भाजनम् ॥

End :—

श्राद्धं कुर्यात्प्रयत्नेन श्राद्धं कृत्वा विधानतः ।
देवपूजां प्रकुर्वीत वैश्वदेवं ततः परम् ॥
वैदिकोऽयं विधिः प्रोक्तः कर्मान्ते ब्रह्मयज्ञकम् ।
प्रश्नब्रह्मपरो यस्तु शाखामन्त्रेऽतिपावने ॥
शाखाध्यायी महाभागः पङ्क्तिपावनपावनः ।
शाखामात्रैकदेशस्याध्ययनाच्छ्रोत्रियत्वकम् ॥
स प्राप्नोत्येव विधिना शाखाध्यायी ततो भवेत् ।
नित्यस्नानस्सदाचारस्सदावाह्निस्सदाशुचिः ॥
सदातुष्टस्सदादान्तस्सदाऽसूयाविवर्जितः ।
अग्निहोत्राद्यभावेऽपि वेदवेदिविवर्जितः ॥
ब्रह्ममेधक्रियाशुद्धः पूर्वतुल्यो भवत्यपि ॥

इत्येतदुक्तं कण्वेन मुनिना धर्म्यमुत्तमम् ।
शास्त्राणां प्रवरं शास्त्रं हिताय जगतां तराम् ॥

Colophon :—

इति कण्वस्मृतिधर्मशास्त्रं समाप्तम् ॥

Subject :—

Upholds the view that the end and aim of Karma is to please God and mentions the Saṁkalpas of various rites. It well describes the ācāra and the daily duties of a householder, the adoption of sons and the rules of the Śrāddha rites.

प्रतिपाद्यविषयः —

अत्रानुष्ठितकर्मणामीश्वरतुष्टिफलकत्वोपवर्णनपूर्वकं तत्तत्कर्मसंकल्पप्रकारमभिधाय अहरहरनुष्ठेयं प्रातःप्रबोधसप्तर्षिस्मरणगण्डूषशौचदन्तधावनस्नानसन्ध्याजपौपासनादिकं कर्मजातं प्रतिपाद्य पाकयज्ञहविर्यज्ञादींन्निरूप्य समावर्तनोद्वाहविधिनिरूपणपूर्वकं गृहस्थधर्मपुत्रप्रतिग्रहश्राद्धविषयः प्रतिपाद्यन्ते ॥

Noteworthy Features.—This smṛti is not included in the collectiou of Smṛtis published in Poona, Calcutta or Bombay. It is not published anywhere else and its content is identical with that of the MS described under 5346 in the India Office Catalogue.

वक्तव्यविशेषः—

अमुद्रितेयं स्मृतिः ॥

No. 21 (A 669/23).

* कण्वस्मृतिः.

* Kaṇva Smṛitiḥ.

Author—Sage Kaṇva.
Substance—Paper.
Size—13 × 8⅜ inches.
Character—Telugu.
Folios—184-196.
Lines on a page—38.

Letters in a line—26.
Age of Ms.—Old.
Condition of Ms—Good.
Acquired or transcribed—
Acquired.
Correct or incorrect—
Not so very correct.
Complete or incomplete—
Complete.

Beginning, End, Colophon and Subject:—as in No. 20.

No. 22 (A 136/17).

कपिलस्मृतिः.

Kapila Smṛtiḥ

Author—Sage Kapila.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Kannada.
Folios—242-295.
Lines on a page—19.
Letters in a line—16.
Age of MS.—Old.
Condition of MS.—Good.
Acquired or transcribed—
Acquired.
Correct or incorrect—
Not so very correct.
Complete or incomplete—
Complete.

Beginning :—

अथ कपिलस्मृतिः—

पुरा तु शौनकः श्रीमान् भाविनं कलिमीक्ष्य वै ।
भीतोऽत्यन्तं कलौ भूम्यां तिष्ठद्विप्रत्वमित्यसौ ॥
अत्यन्तं चिन्तयाऽऽविष्टः कपिलं विष्णुरूपिणम् ।
अवशादागतं वीक्ष्य प्रहृष्टस्सत्वरं तथा ॥
समुत्थायाभिवाद्यैनं गामर्घ्यमुदकं शिवम् ।
कल्पयित्वा नष्टश्रमं पश्चात्प्राञ्जलिरब्रवीत् ॥

End :—

पुरुषसूक्तं च नवकं शिवसंकल्पकं तथा ।
रौद्रवैष्णवगायत्र्या शाखा चोपनिषत्तु वा ॥
त्रियम्बकमिदंविष्णुपदकास्तारकास्स्मृताः ।
सर्वेष्वपि च कृत्येषु कपिलेनेदमीरितम् ॥

धर्मशास्त्रं महासारं सर्वलोकोपकारकम् ।
पठन् भक्त्या द्विजो नित्यमश्वमेधफलं लभेत् ॥

Colophon:—

इति कपिलस्मृतिस्समाप्ता ॥

Subject:—

Deals in detail with the various kinds of Srāddhas, adoption, pious gifts, inheritance, adoption by a widow, division of property among the Aurasa and Dattaka sons, etc.

प्रतिपाद्यविषयः—

युगधर्माणामनिन्द्यत्वं, भाषाग्रन्थप्राचुर्येण वेदानामप्रचारः, तथागतमतेन वैदिकमार्गनिरोधः, वेदाध्येतृप्रशंसा, नित्यनैमित्तिकादिश्राद्धानामवश्यकरणीयत्वं, तद्विधिश्च, नान्दीश्राद्धं, सपिण्डीकरणपार्वणश्राद्धानि, एकोद्दिष्टश्राद्धं, आशौचं, अपुत्रपितृव्यादीनां पितृवच्छ्राद्धं, भ्रात्रादीनामेकोद्दिष्टेन श्राद्धं, सपिण्डीकरणानन्तरं कर्तव्यानि श्राद्धानि, श्राद्धानां परिगणनं, पितृश्राद्धस्याऽन्नेनैव कर्तव्यत्वं, श्राद्धे पाकार्हाः, पुनश्श्राद्धनिमित्तं, कर्मान्तरोपयुक्तद्रव्यस्य श्राद्धानर्हत्वं, अपाङ्क्तयाः, निमन्त्रितब्राह्मणपूजा, सहभोजने वर्ज्याः, ब्राह्मणस्योत्तमत्वं, दत्तकेन पुनर्जनकगोत्रप्रवेशे कर्तव्यश्राद्धादिक्रमः, पुत्रदाने तन्मातामहाभ्यनुज्ञा, पुत्रदानप्रकारः, दत्ते मृते जनकयोराशौचक्रमः, दानकालाः, दानभेदाः, दानविधिः, ग्रामभूम्यादिषु विवादे राज्ञा व्यवस्थापनं, पुत्रपौत्राद्यनुज्ञयैव दानं, विभक्तापुत्रधनस्य दौहित्रगामित्वं, बहुषु दौहित्रेषु निर्धनस्यैव मातामहधनभाक्त्वं, सन्ततिविच्छेद एव सगोत्राणामेव भूमिदानं, विधवानां भूमिविक्रयादियोग्यताराहित्यं, रण्डापक्वस्याभक्ष्यत्वं, विधवाभेदाः, विधवायाः पुत्रस्वीकरणयोग्यता, विधवाधर्माः, स्नुषादिभिर्विधवाभिः पक्वस्यानिन्द्यत्वं, विश्वस्तानीताऽन्नयादीनां निन्द्यत्वं, अपत्नीकत्वेऽपि पुत्रिणोऽनाश्रमित्वाभावः, पुत्रवत्त्वप्रशंसनं, दत्तौरसयोर्दायक्रमः, दौहित्रप्राशस्त्यं, ज्येष्ठस्यादेयत्वं, अनेकपुत्रसत्त्व एव पुत्रदानयोग्यता, जडमूकादीनामस्वीकार्यत्वं, दत्तस्य मरणेऽन्यस्याप्रतिग्रहः, औरसपुत्रिकापुत्रापविद्धेतरेषां पुत्राणां निन्द्यत्वं, केचन राजदण्डाः;

ब्राह्मणप्राशस्त्यादि, तुलादानादि, नीचात् परिगृह्यापि यज्ञानुष्ठानस्यावश्यकत्वं, गायत्र्यादिजपस्योत्तारकत्वं, एतच्छास्त्रपठनफलं चेत्येतान्यत्र निरूप्यन्ते ॥

Noteworthy Features.—This work is not included in the collection of Smṛtis published in Poona, Calcutta, or Bombay. Manuscript copies of the work are also available in the India Office Library. *Vide* Catalogue, No. 5349, 5350.

No. 23 (A 669/23).

कपिलस्मृतिः.

Kapila Smṛtiḥ.

Author—Sage Kapila.
Substance—Paper.
Size—13×8$\frac{3}{8}$ inches.
Character—Telugu.
Folios—214-232.
Lines on a page—33.
Letters in a line—30.

Age of MS.—Old.
Condition of MS—Good.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.
Correct or incorrect–Correct.

Beginning, end and colophon—As in No. 22.

No. 24 (4064/2).

*** काश्यपस्मृतिः.**

* Kāśyapa Smṛtiḥ.

Author—Sage Kaśyapa.
Substance—Palm-leaf.
Size—8$\frac{1}{8}$ × 2$\frac{1}{4}$ inches.
Character—Grantha.
Folios—52-79.
Lines on a page—12.
Letters in a line—32.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Acquired or transcribed—Acquired.
Complete or incomplete—Complete.

Beginning :—

काश्यपं कमलाकान्तपदपङ्कजषट्पदम् ।
अभिसंगम्य मुनय इदं वचनमब्रुवन् ॥
भगवन् सर्वधर्माणामाश्रमाणां च नित्यशः ।
कर्तव्यानि मुनिश्रेष्ठ कर्माणि वद नः प्रभो ॥
काश्यपोऽपि हरिं नत्वा ध्यात्वा क्षणमतन्द्रितः ।
मुनीन् संपूज्य विधिवदिदं वचनमब्रवीत् ॥
शृणुध्वं मुनयस्सर्वे ब्रह्मणोक्तानि मे पुरा ।
तानि सर्वाणि कर्माणि वेदोक्तानि वदामि वः ॥

End :—

एतच्छ्रुत्वा ब्रह्मणोक्तं युष्माकं गदितं द्विजाः ।
इदं शास्त्रमधीयानो ब्राह्मणस्संशितव्रतः ।
सर्वपापानि संत्यज्य वैष्णवीं पदवीं व्रजेत् ।
ततो विप्रास्समुत्थाय काश्यपं प्रणिपत्य च ॥
अर्चयित्वा यथान्यायं जग्मुस्ते स्वाश्रमं प्रति ।
काश्यपीयमिदं शास्त्रं श्रुत्यर्थं हितमुत्तमम् ॥
अधीत्य ब्राह्मणो याति नात्र कार्या विचारणा ॥

Colophon :—

इति काश्यपस्मृतिस्समाप्ता ॥

Subject :—

Deals with the daily duties of a Gṛhastha or householder.

प्रतिपाद्यविषयः—

प्रातःकर्तव्यं हरिनामकीर्तनादि, मूत्रपुरीषोत्सर्गविधिः, शौचविधिः, गण्डूषाचमनादिविधिः, दन्तधावनं, स्नानं, वस्त्रादिधारणं, ऊर्ध्वपुण्ड्रधारणविधिः, पुण्ड्रप्रमाणादि, पुण्ड्राङ्कितप्रशंसा, पद्माक्षादिधारणं, ब्रह्मर्ष्यादितर्पणं, वस्त्रनिष्पीडनं, संध्योपासनं, अर्घ्यप्रदानं, गायत्रीजपः, प्रतिष्ठितपद्माक्षमालादिभिर्जपः, मूलमन्त्रादिजपः, संध्योपस्थानं, भागवतंप्रणामादि, प्रणामानर्हाः, गृहस्याभ्युक्षणवारिणा प्रोक्षणं, देवगृहं प्रविश्य प्राणायाममन्त्रजपादि, देवगृहे वर्जनीयानि कर्माणि, अग्निहोत्रादि,

ब्रह्मयज्ञः, समित्पुष्पादिसंग्रहणं, देवपूजार्हद्रव्याणि, माध्याह्निकस्नानं, माध्याह्निकसंध्या, अष्टाक्षरादिजपः, भगवदाराधनं, क्षत्रियादीनां सालिग्रावपूजानिषेधः, पञ्चयज्ञाः, भोजनविधिः, भोजननियमाः, प्राणाहुतेः परमेव पात्रे लवणव्यञ्जनादिपरिवेषणादयः, भोज्याभोज्यान्नानि, देवयोग्यशाकाः, रामायणपारायणतत्प्रशंसनादि, सायंसन्ध्याविधिः, सायमौपासनवैश्वदेवभोजनादि, शयनविधिः, इत्यादयोऽत्र सरलशैल्या प्रतिपाद्यन्ते—

Noteworthy Features.—This version of the work seems to differ to a great extent from that published in Bombay.

वक्तव्यविशेषः—

स्मृतिरियममुद्रिता ॥

No. 25 (A 137/2).

गौतमस्मृतिः.

Gautama Smṛtiḥ.

Author—Sage Gautama.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—159–243.
Lines on a page—16.
Letters in a line—16.
Age of MS—Old.

Condition of MS—Good.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.

Beginning :—

श्रीहयग्रीवाय नमः ॥

गौतमं मुनीनां श्रेष्ठं सर्वधर्मविदां वरम् ।
शिवभक्तं समेत्यैतं नारदो वाक्यमब्रवीत् ॥
भगवन् सर्वशास्त्रज्ञ शिवभक्त जितेन्द्रिय ।
वर्णानामाश्रमाणां च धर्मान्मे ब्रूहि गौतम ॥

गौतमः—

शृणु नारद वक्ष्यामि धर्मशास्त्रं सुखप्रदम् ।
पापापहं पाठकानां मोक्षैकफलदायकम् ॥
ब्रह्मावर्तः परो देशः ऋषिदेशस्ततोऽधमः ।
मध्यदेशस्ततो न्यून आर्यावर्तस्ततोऽधमः ॥

End:—

भिन्नपादा तु गायत्री ब्रह्महत्याविनाशिनी ।
अभिन्नपादा गायत्री ब्रह्महत्याप्रदायिनी ॥
अभिन्नपादां गायत्रीं जपं कुर्वीत यो द्विजः ।
अधोलोकमवाप्नोति ब्रह्महा स प्रजायते ॥
ऊर्ध्वं मुहूर्तात्कुतपात्संक्रान्तिर्यदि दृश्यते ।
पूर्वमासे तु कर्तव्यं कुर्यात्प्राक्कुतपाद्यदि ॥

Colophon :—

इति गौतमस्मृतौ चतुर्दशोऽध्यायः ॥

Subject :—

Details the daily duties of a Brahmacārin, âcāras and Srāddhas and rules regarding the performance of funeral rites of parents, etc.

प्रतिपाद्यविषयः—

ब्रह्मावर्तादिदेशाः, कर्मसामान्यपरिभाषा, धर्मस्वरूपं तत्प्रमाणादिकं च प्रथमाध्याये निरूप्यते । द्वितीये—शौचविधिः, तृतीये—दन्तधावनविधिः, चतुर्थे—शुद्धाचमनविधिः, पञ्चमषष्ठयोः—स्नानं तदवान्तरभेदाः, संध्योपासनं च, सप्तमे गायत्रीजपः, होमविधिः, स्थालीपाकः, त्र्यम्बकादिमन्त्रजपप्रकारश्च, अष्टमे—श्राद्धविधिः, ब्राह्मणादियोग्यवासांसि, अनध्यायाः, कर्मविपाकः, ब्रह्मचारिकृत्यं, प्राजापत्यादिकृच्छ्रप्रत्याम्नायाः, मातापित्रोरन्यतरदशाहमध्ये अन्यतरमरणे विधिः, तत्राशौचक्रमः, दशाहातिक्रमे और्ध्वदैहिकाविधिश्च, नवमे—सञ्चयात्प्राक्पश्चाद्वा सुतस्यागमने कर्तव्यक्रमः, ज्येष्ठेन कनिष्ठेन वा सुतेन प्रेतकार्ये कृते अन्यतरागमने विधिः, एकोद्दिष्टसापिण्डीकरणादिविधिश्च, दशमे—दर्शसंक्रान्त्यादिश्राद्धं, निमन्त्रणार्हाः, अन्ये च श्राद्धे कतिचन नियमाः, श्राद्धार्हदेशाकादयश्च, एकादशे—श्राद्धक्रियावृद्धिश्राद्धादि, पिण्डनिर्वा-

पादि च, द्वादशे—विस्तरेण श्राद्धविधिः, त्रयोदशे—भोजनविधिः स्नानाङ्गतर्पणादि, पवित्रधारणादि च, चतुर्दशे—मृण्मयादिपात्रस्थोदकेन संध्याकरणं, मार्जनविधिः, गायत्रीजपविधिः इत्यादयो निरूपिताः ॥

Noteworthy Features.—This Smṛti is in 14 Adhyāyas and is fairly identical in content with MSS *N*os. 5354, 5355 and 5356 of the India Office Library Catalogue. It is printed at Madras in Telugu characters with a Telugu commentary.

No. 26 (A 669/9).

गौतमस्मृतिः.

Gautama Smṛtiḥ.

Author—Sage Gautama.
Substance—Paper.
Size—13 × 8⅝ inches.
Character—Telugu.
Folios—50–67.
Lines on a page—25.
Letters in a line—25.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, end, colophon and subject—As in No. 25.

No. 27 (3154/8).

गौतमस्मृतिः.

Gautama Smṛtiḥ.

Author—Sage Gautama.
Substance—Palm-leaf.
Size—14¾ × 1½ inches.
Character—Grantha.
Folios—51–75.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Not so good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

गौतमं ऋषिणां ? श्रेष्ठं सर्वज्ञं वेदपारगम् ।
शुद्धस्फटिकसङ्काशं महेन्द्रशिखरोपमम् ॥
बद्धपिङ्गजटाजूटं तटित्कनककुण्डलम् ।
. . . . स्फुरदिन्दीवरेक्षणम् ॥
मौक्तिकाभाक्षवलयं जपन्तं सामसूत्रिणम् ।
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम् ॥
विनयेनोपसङ्गम्य शिरसा प्रणिपत्य च ।
नारदः परिपप्रच्छ देवर्षिगणमध्यगम् ॥
भगवन् सर्वधर्मज्ञ सर्वज्ञ करुणानिधे ।
वर्णानां" . . . . ॥

इत्यादि शिष्टं—No. 25 कोशवत्.

End, Colophon ond Subject:—

As in No. 25.
No. 25 कोशवत्.

प्रतिपाद्यविषयः—

No. 25 कोशवत्.

वक्तव्यविशेषः—

No. 25 कोशवत्.

No. 28 (A 136/10).

दक्षस्मृतिः.

Dakṣa Smṛitiḥ.

Author—Sage Dakṣa.
Substance—Paper.
Size—12¾ × 8 inches.
Character—Kannada.
Folios—109-118.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

सर्वशास्त्रार्थतत्वज्ञस्सर्ववेदाविदां वरः ।
पारगस्सर्वविद्यानां दक्षो नाम प्रजापतिः ॥
उत्पत्तिं प्रकृतिं चैव स्थितिं संहारमेव च ।
सर्वमात्मनि संपश्यन्नात्मा ब्रह्मण्यवास्थितः ॥
भूतं भव्यं भविष्यं च जगत्स्थावरजङ्गमम् ।
पुराणन्यायमीमांसाधर्मशास्त्रप्रयोजनम् ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एतेषां तु हितार्थाय दक्षः शास्त्रमकल्पयत् ॥

End :—

ततश्शास्त्राण्यधीयन्ते श्रयन्ते ग्रन्थविस्तराः ।
प्रणवो धनुश्शरो ह्यात्मा तत ˙ ˙ चक्षुषा ग्रहम् ।
मनसा त्वोपपन्नेन ? दृश्यते सूक्ष्मदर्शिभिः ॥
तत्वार्थज्ञानविज्ञानं विज्ञानात्प्रत्ययं तथा ।
प्रत्ययाद्भावशुद्धिस्स्याद्भावसंशुद्धिमत्परम् ।
आक्रोडविरते भावे भावमास्थाय भावितम् ।
आत्मसंस्थं मनः कृत्वा न किञ्चदपि चिन्तयेत् ॥

Colophon :—

इति दक्षस्मृतिस्समाप्ता ॥

Subject :—

Deals with the duties of a house-holder, his ācāra, śauca, and āśauca; the duties of an ascetic, yoga and its practice, etc. There is a reference in this work to the two classes of Brahmacārins, the Naiṣtikas and the Upakurvāṇas, the superiority of the order of the house-holder and the prāyaścitta for the anāśrami. A resumè of the teachings of the Dvaita and the Advaita schools is found in this work.

प्रतिपाद्यविषयः—

उपनयनादर्वाक् भक्ष्याभक्ष्यादावदोषः, नैष्ठिकोपकुर्वाणकयोर्ब्रह्मचारिणोरभिधानम्, अनाश्रमिणः प्रायश्चित्तम्, प्रातस्स्नानविधिः,

प्रातस्स्नायिनः प्रशंसनं, आग्नेयादिस्नानानि, ब्राह्मादितीर्थानि, आचमनविधिः, देवपितृकार्यकालाः, वेदाभ्यासस्य पाञ्चविध्यं, पोष्यवर्गः, स्नानीयमृत्तिकाः, नित्यस्नानभेदाः, कालविशेषे यमुनायां तर्पणं, गृहाश्रमिणां प्रशंसा, स्नानदानाद्यकृत्वा भोजने नरकावाप्तिः, संविभागकर्तुः स्वर्गप्राप्तिः, केचिद्गृहस्थधर्माः, गृहस्थस्य पैशुन्यादीनि विकर्माणि, दानप्राशस्त्यादि, अदेयवस्तूनि, न्यायार्जितद्रव्यविनियोगप्रकारः, स्त्रीगुणाः, शौचविधिः, शौचभेदाः, दाने फलविशेषाः, अनुकूलप्रतिकूलकलत्रनिरूपणं, जननमरणाशौचं, राजादीनां सद्यश्शौचादि, यज्ञादिकर्मस्वनाशौचं, योगस्य षडङ्गत्वं, योगसाधनोपायाः, ध्यानयोगः, त्रिदण्डिलक्षणं, यतिधर्माः, योगिप्रशंसा, द्वैतपक्षः, अद्वैतिमतं, इत्येतानि समासेन प्रतिपाद्यन्ते ॥

Noteworthy Features.—This version of the text begins as in the versions printed in Calcutta and Bombay, but the text is not divided into chapters and differs to some extent at the end of the work. Since some of the MS copies of the work either omit or add certain passages or amend the readings of the text, one is led to conclude that there are several recensions of the work. But as a matter of fact this is not true. It may, however, be said that some MS copies give the text without a division into chapters while others divide it into seven chapters. (*See* the MSS described in the I. O. C. Nos. 5363—5368 and compare the texts with those printed at Bombay and Calcutta.

वक्तव्यविशेष :—

मुम्बयीकल्कत्तानगरयोर्मुद्रितकोशेषु तत्र तत्र पाठभेदाः ग्रन्थन्यूनाधिकभावः अध्यायसप्तकेन ग्रन्थविभागश्चेत्येतत्सर्वं परिदृश्यते । अत्र त्वध्यायविभागो न दृश्यते । आनन्दाश्रममुद्रितकोशे तु बहुधा वैलक्षण्यमुपलभ्यते ॥

No. 29 (A 669/13).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance— Paper
Size—13 × $8\frac{3}{8}$ inches.
Character—Telugu.
Folios—125–130.
Lines on a page—26.
Letters in a line—26.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End etc.—As in No. 28.

No. 30 (4487/6).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa Brahma.
Substance—Palm-leaf.
Size—10 × 2 inches.
Character—Nāgari.
Folios—28–38.
Lines on a page—9.
Letters in a line—44.
Age of MS—Old.
Conditions of Ms—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning, End etc.—As in No. 28.

No. 31 (3534/3).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.
Size—$15\frac{3}{4}$ × $1\frac{1}{2}$ inches.
Character—Grantha.

Folios—207-214.
Lines on a page—7.
Letters in a line—50.
Age of MS —Old.
Condition of MS.—Good

Correct or incorrect—
Correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning—As in No. 28.

End:—

यज्ञकाले विवाहे च देवयागे तथैव च ।
ह्रूयमाने तथैवाग्नौ नाशौचं न च सूतकम् ॥
एवंगुणविशेषेण सूतकं समुदाहृतम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥
त्रिविधं सूतकं प्रोक्तं मरणं च तथाविधम् ॥

Colophon:—

इति दक्षप्रजापतिस्मृतिः समाप्ता ॥

Subject, as in No. 28.

Noteworthy Features.—The MS. closes with the 6th chapter of the work as in the printed versions.

The portion treating of yoga and its practice, the duties of an ascetic, the doctrines of the Schools of Advaita and Dvaita, are omitted.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिराशौचप्रकरणपर्यन्तैव दृश्यते । कोशान्तरेषु मुद्रिते च परिदृश्यमानो योगतत्साधनयतिप्रशंसाद्वैताद्वैतादिनिरूपणपरस्ततःपरो ग्रन्थोऽत्र न दृश्यते । यद्यप्यन्ते 'दक्षप्रजापतिस्मृतिस्समाप्ता' इत्याशौचप्रकरणान्त एव स्मृतिसमाप्तिस्सूच्यते । तथाऽपि कोशान्तरेषु अधिकग्रन्थोपलम्भादियमसमग्रेति वा कोशान्तरदृश्यमानाधिकग्रन्थभागस्य प्रक्षिप्तत्वं वाऽभ्युपेयमिति भाति ॥

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.
Size—$15\frac{7}{8} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—9-15.
Lines on a page—9.
Letters in a line—55.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning, end, etc.—As in No. 28.

No. 34 (3154/3).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.

Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.

No. 32 (2852/9).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.
Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—199-203.
Lines on a page—8.
Letters in a line—60.
Age of MS—Old.

Condition of MS.—Not good
Correct or incorrect—Not very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End etc.—As in No. 28.

No. 33 (3798/2).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.
Size—$15\frac{7}{8} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—9-15.
Lines on a page—9.
Letters in a line—55.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, end, etc.—As in No. 28.

No. 34 (3154/3).

दक्षस्मृतिः.

Dakṣa Smṛtiḥ.

Author—Sage Dakṣa.
Substance—Palm-leaf.

Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.

Folios—11-17.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Not very good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning—As in No. 28.

End:—

आषष्ठमासात् ज्ञातीनां सद्यः खननसंस्कृतौ ।
दाहेऽहस्ततऊर्ध्वं तु दाहे त्यागे त्र्यहं भवेत् ।
खननेऽहस्तत्र चौले कृते तु त्र्यहमिष्यते ।
संस्कारदिनमारभ्याशौचमेतद्विधीयते ।
अनुपेत उपेते वा मृते गर्भाष्टमे समे ।
ब्राह्मणानां सपिण्डानां दशरात्रमघं भवेत् ।
कन्यामृतौ सपिण्डानां तृतीयाद्वत्सरादधः ।
सद्यो निशाऽष्टवर्षात्प्राक्त्रिरात्रं चाविवाहतः ॥

Colophon:—

दक्षस्मृतिस्समाप्ता ॥

Subject as in No. 28.

Noteworthy Features.—The last chapter of the work as in No. 31, is omitted but contains, in the chapter on Aśauca, twenty verses more than the other work.

वक्तव्यविशेषः—

No. 31 कोशवत् । परंत्वत्रान्ते प्रायस्ततोऽधिका विंशतिः श्लोका आशौच एव कतिचनविशेषप्रतिपादका दृश्यन्ते ॥

No. 35 (A136/4).

देवलस्मृतिः.

Dêvala Smṛtiḥ.

Author—Sage Dêvala.
Substance—Paper.
Size—12¾×8 inches.
Character—Telugu.

Folios—36-39.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.

Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Incorrect.

Beginning:—

सिन्धुतीरे समासीनं देवलं मुनिसत्तमम्।
समेत्य मुनयस्सर्वे इदं वचनमब्रुवन्॥
लोके म्लेच्छाश्च शुण्ठाश्च सुखाच्छुद्धिमवाप्नुयुः।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चैवानुपूर्वशः॥
कथं स्नानं कथं शौचं प्रायश्चित्तं कथं भवेत्।
किमाचारा भवेयुस्तु चैतदाचक्ष्व विस्तरम्॥

End :—

म्लेच्छैर्नीतस्य विप्रस्य पञ्चगव्यं विशोधनम्।
न पञ्चगव्यात्परमं पवित्रमिह विद्यते॥
विप्रपत्न्यास्ततस्तस्याः प्रायश्चित्तमिदं मतम्।

Colophon:—

देवलधर्मशास्त्रं समाप्तम्॥

Subject :—

Deals with such purificatory rites as Tilahoma, Panchagavya, etc.

प्रतिपाद्यविषयः—

त्रिशङ्कुदेशे दिनमात्रवासेऽपि पातित्यं, म्लेच्छैर्नीतानां ब्राह्मणादीनामपेयपानादौ प्रायश्चित्तं, सिन्धुसौवीरसौराष्ट्रादिगमने प्रायश्चित्तं, म्लेच्छैर्बलान्नीतानां शूद्रक्षत्रियस्त्रीणां प्रायश्चित्तं, तथा बालादीनां प्रायश्चित्तं, रजस्वलयोरन्योन्यस्पर्शे प्रायश्चित्तं, असवर्णाहितगर्भायाः स्त्रियाः प्रायश्चित्तं, म्लेच्छैस्सहोषितस्य प्रायश्चित्तं, सभायां म्लेच्छस्पर्शे प्रायश्चित्तं, म्लेच्छत्वमापन्नयोः पित्रोर्मरणे नियमः, पञ्चगव्यविधानं, तिलहोमादिविधानं, म्लेच्छसहवाससंभाषणादौ प्रायश्चित्तं, इत्येते प्रायश्चित्तविशेषा अभिधीयन्ते॥

Noteworthy Features.—This work is printed in Madras and Poona. It appears to be a late compilation. There is reference in it to the "Mlecchas" who may probably be the Mahomedans.

There is another Smṛiti work ascribed to Dêvala which seems to be quite different from the one described above and from which several verses are quoted in the Smṛitichandrika and such other Smṛiti works.

वक्तव्यविशेषः—

मुद्रितेयं स्मृतिः.

No. 36 (A 669/3).

देवलस्मृतिः.

Dêvala Smṛtiḥ.

Author—Sage Dêvala.
Substance—Paper.
Size—13 × 8⅝ inches.
Character—Telugu.
Folios—7-9.
Lines on a page—26.
Letters in a line—22.
Age of MS—Old.
Condition of MS—Good.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.

Beginning, End, Colophon etc. as in No. 35.

No. 37 (3154/15)

देवलस्मृतिः.

Dêvala Smṛtiḥ

Author—Sage Dêvala.
Substance—Palm-leaf.
Size—14¾ × 1½ inches.
Character—Grantha.
Folios—132-134.
Lines on a page—7.
Letters in a line—50.
Age of MS—Old.
Condition of MS—Not so good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Almost Complete.
Acquired or transcribed—Acquired.

Beginning :—

संस्कारप्रमुखं तस्य सर्वं कार्यं यथाविधि ।
संस्कारान्तेषु विप्राणां दानं धेनुश्च दक्षिणा ॥
दातव्यं शुद्धिमिच्छद्भिः अश्वगोभूमि ... . ।
.... कुडुम्बानां पाङ्क्तिं प्राप्नोति नान्यथा ॥
स्वभार्यां च यथान्यायं गच्छेच्चैव विशुध्यति ।
अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यथा भवेत् ॥

End:—

पराकं पञ्चदशके विंशे कृच्छ्रं समाचरेत् ।
उदरं प्रविशेद्यस्य पञ्चगव्यं विधानतः ॥
यत्किञ्चिद्दुष्कृतं तस्य सर्वं नश्यति देहिनः ।
पञ्च सप्ताष्ट दश वा द्वादशाहोऽपि विंशतिः ॥
म्लेच्छैर्नीतस्य विप्रस्य पञ्चगव्यं विशोधनम् ।

Colophon:—

इति श्रीदेवलप्रोक्तं धर्मशास्त्रं समाप्तम् ॥

Subject and Noteworthy features as in No. 35.

No. 38 (3624).

नारदस्मृतिः.

Nārada Smṛtiḥ.

Author—Sage Nārada.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—1-18.
Lines on a page—11.
Letters in a line—56.
Age of MS—Old.

Condition of MS—Not good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

सहस्त्रद्विशतपञ्चाशच्छकवर्षे मृगे रवौ ।

अखिलं मानवं शास्त्रं श्रीमद्गरुडमाधवः ।
.... ।

मनुः प्रजापतिर्यस्मिन् काले राज्यमबूभुजत् ।
.... पुरुषास्तदाऽऽसन्त्सत्यवादिनः ॥

तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रवर्तते ।
द्रष्टा च व्यवहाराणां राजा दण्डधरः कृतः ।
लिखितं साक्षिणश्चैव द्वौ विधी संप्रकीर्तितौ ॥

End:--

देशं कालं दिशं जातिं नामरूपं प्रतिश्रयम् ।
कृत्यं कर्मसहायाश्च प्रष्टव्या .... ॥

Subject':—

This Smṛti is divided into 27 sections of which 18 are devoted to the study of the law of Debt: Kinds of debt, its calculation, documents, recovery of debts, etc. The other important topics dealt with are evidence, documentary and oral, the oaths and ordeals, details of judicial procedure, partnership, rules of contract and breach of contract, business rules regarding the sale or purchase of properties, division of property, etc.

प्रतिपाद्यविषयः—

ऋणादानाद्यष्टादशव्यवहारनिर्णायिकेयं स्मृतिः । अत्र प्रथमं व्यवहारमातृकायां—सर्वव्यवहारोपयोगिनो लिखितसाक्षिप्रतिज्ञोत्तरतत्स्वरूपादयो निरूपिताः । ततस्सभोपदेशनाम्नि प्रकरणे—सभासभ्यादीनां स्वरूपादि निरूप्यते । ततः ऋणदानग्रहणधर्मके ऋणादानात्मके प्रथमे व्यवहारपदे—देयमृणं, अदेयमृणं, पतिपित्रादिसद्भावे भार्यापुत्रादीनां ऋणग्रहणादावस्वातन्त्र्यं, शुक्लकृष्णशबलभेदेन धनस्य त्रैविध्यं, पुनस्तस्य श्रुतागतादिभेदैः साप्तविध्यं, तत्स्वरूपं च, सर्ववर्णानां धर्म्यो धनागमोपायः, ब्राह्मणेन विक्रेयवस्तूनि, लिखितादिप्रमाणानि, भुक्तिप्रमाणस्य गरीयस्त्वं, भोगाविनाश्यानि, अनागमभोगस्य दौर्बल्यं, त्रिपुरुषोपभोगेऽनागमस्यापि भोगस्य प्राबल्यं, कुसीदभेदाः, हिरण्यधान्यवस्त्ररसादिषु

वृद्धिः, ऋणप्रयोक्तुरभावे प्रत्यर्पणक्रमः, प्रतिभूधर्मः, आधिः, तद्भेदः, आधौ नियमाः, लेख्यं, तद्विभागः, लेख्यसिद्ध्यसिद्ध्यादि, लेख्यपरीक्षा, साक्षिणः, तत्सङ्ख्या. साक्षित्वार्हानर्हाः, साक्ष्यभावेऽपि केषुचिद्व्यवहारप्रवर्तनं, साक्षिप्रश्नप्रकारः, दिव्यप्रमाणार्हा विवादाः, शपथकरणं, वह्नितुलादिदिव्यप्रमाणानि, तत्प्रयोगकालाः, तुलानिर्माणक्रमः, तोलनविधिः, वह्निदिव्यप्रयोगविधिः. जलदिव्यविधिः, विषदिव्यविधिः, अभिमन्त्रितजलात्मककोशदिव्यविधिः, तुलादिदिव्यानामधिकारिणः, तण्डुलदिव्यं, तप्तमाषदिव्यं, इत्येतानि निरूप्यन्ते ॥

द्वितीये उपनिधिप्रकरणे—निक्षेपः, तद्भेदः, तद्विधिश्च निरूप्यन्ते ॥

तृतीये सम्भूयसमुत्थानप्रकरणे—वणिगादीनां सम्भूय व्यवहरतां धर्मः प्रदर्श्यते ॥

चतुर्थे दत्ताप्रदानिके—देयादेयधने सविभागं निरूप्येते ॥

अभ्युपेत्याशुश्रूषाख्ये पञ्चमे—शुश्रूषककर्मकरादीनां शुश्रूषादिविधिर्निरूप्यते ॥

वेतनानपकर्माख्ये षष्ठे—वेतनदानं, गृहीतवेतनानां प्रतिदानक्रमश्च निरूप्येते ॥

अस्वामिविक्रयाख्ये सप्तमे—अस्वामिना विक्रये व्यवहारक्रमः, निधिलाभे राजगामित्वतदभावौ चेत्येते निरूप्यन्ते ॥

विक्रीयासंप्रदानाख्येऽष्टमे — क्रयविक्रयविधिः, विक्रीयासंप्रदाने दण्डादयश्च निरूप्यन्ते ॥

क्रीत्वाऽनुशये नवमे—क्रीत्वाऽनभिमन्यमाने मूल्यह्रासादिविधिर्निरूप्यते ॥

समयानपाकर्माख्ये दशमे—पाषण्डिनैगमादीनां पारिभाषिकधर्मैः व्यवस्थानक्रमः प्रदर्श्यते ॥

सीमाबन्धाख्ये एकादशे—क्षेत्रसीमानयनविधिः, सीमाविषये मिथ्याभाषणे दण्डः, सीमामध्यस्थवृक्षफलपुष्पादीनां स्वामिनः, क्षेत्रमध्यस्थसेत्वादिनिरोधे दण्डः, सेतुभेदाः, अजादिभिस्सस्यघाते दण्डः, पालकदोषादिना गवादीनां नाशे दण्डादयश्च निरूप्यन्ते ॥

स्त्रीपुंसयोगाख्ये द्वादशे—पाणिग्रहणं, पुरुषलक्षणं, षण्डभेदाः, कन्यादानेऽधिकारिणः, कन्यादूषणे दण्डः, कन्यादोषाः, विवाहभेदाः,

पुनर्भूस्वैरिणीभेदाः, स्त्रीसङ्ग्रहणपरिज्ञानोपायः, स्त्रीसङ्ग्रहणे दण्डः, सपत्नीमात्रादिगमने दण्डः, देवरनियोगः, कुलटादण्डः, वर्णजातिविवेकः इत्येते निरूप्यन्ते ॥

दायभागाख्ये त्रयोदशे—दायभागनिर्वचनं, विभागकालः, तदधिकारिणः, विभागानर्हाणि, विभागे पित्रादीनामंशक्लृप्तिः, जडादीनामनंशता, संसृष्टेषु विधिः, अविभक्तानपत्यप्रजावतीभरणं, असंस्कृतानां भ्रातॄणां स्वांशादादायापि संस्कारस्यावश्यकत्वं, विभागानन्तरं पाकभेदादि, विभागानन्तरकालोत्पन्ने दायः, औरसादिद्वादशपुत्राः, पुत्राभावे दुहितुर्धनहारित्वं, इत्येतानि प्रतिपाद्यन्ते ॥

साहसाख्ये चतुर्दशे—मनुष्यमारणादिषु दण्डः प्रतिपाद्यते ॥

द्यूतसमाह्वयाख्ये षोडशे—द्यूतमर्यादा, तदतिक्रमे दण्डश्च प्रतिपाद्यते॥

वाग्दण्डपारुष्याख्ये पञ्चदशे—निष्ठुरोक्त्यादिवाक्पारुष्ये अङ्गच्छेदादिदण्डपारुष्ये च राजदण्डोऽभिधीयते ॥

सप्तदशे प्रकीर्णकव्यवहारोऽभिधीयते ॥

परिशिष्टाख्ये अष्टादशे—तस्करभेदाः, तद्विषये दण्डाश्चाभिधीयन्ते॥

Noteworthy features:—This is the only Smṛti, in which Law, properly so called, is treated by itself without any reference to rules of penance, diet and other religious subjects. Several of the doctrines propounded by Nārada are opposed to the teachings of Manu, for *e.g.*, the practice of Niyoga, re-marriage of widows, etc.

वक्तव्यविशेषः—

मुद्रितेयं स्मृतिः कलकत्तानगरे ॥

No. 39 (3154/7).

* नारदस्मृतिः.

* Nārada Smṛtiḥ.

Author—Sage Nārada.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—37-50.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.

Condition fo MS—Good.
Correct or incorrect—
Corretc.

Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning :—

नारदं मुनिमासीनं नारायणपरायणम् ।
यथान्यायं संप्रणम्य कण्वः प्राह तपोनिधिम् ॥

भगवन् सर्वधर्मज्ञ सर्वलोकहिते रत ।
कैः कर्मभिर्नरा लोकानुत्तमाधममध्यमान् ।
प्राप्नुवन्ति महाभाग तानि कर्माणि मे वद ॥

नारदः—

अधुना संप्रवक्ष्यामि त्रिविधं कर्म तत्वतः ।
सात्विकं राजसं चैव तामसं त्रिविधं स्मृतम् ॥

End :—

आयासादथवाऽऽलस्याच्च कीर्तयति केशवम् ।
तस्य जिह्वा दर्दुरिका भवत्येव न संशयः ।
हरिसंकीर्तनादन्यत्पवित्रं नेह विद्यते ।
तस्मात्संकीर्तयेद्विष्णुं सर्वपापप्रणाशनम् ॥

इदं शास्त्रं मया प्रोक्तं धर्मसारमनुत्तमम् ।
यः पठेच्छ्रावयेद्वाऽपि तावुभौ मोक्षगामिनौ ॥

Colophon:—

इति नारदस्मृतौ तृतीयोऽध्यायः ॥ नारदस्मृतिस्समाप्ता ॥

Subject:—

This is a Smṛti in three chapters dealing exclusively with acāra, prāyaścitta and allied topics.

प्रतिपाद्यविषयः—

अत्र प्रथमेऽध्याये—कर्मणां सात्विकादिभेदेन त्रैविध्यं, प्रातर्भगवन्नामकीर्तनविधिः, मलमूत्रोत्सर्गविधिः, शौचविधिः, श्रौतस्मार्त-

पौराणाचमनानां स्वरूपं, दन्तधावनविधिः, स्नानविधिः, पुण्ड्रधारणविधिः इत्येते निरूप्यन्ते ॥

द्वितीयेऽध्याये—सन्ध्योपासनविधिः, तत्र गायत्रीजपविधिः, जपकालिकानियमाः, सन्ध्योपस्थानं, अष्टाक्षरादिजपः, आधारशक्त्यादितर्पणम्, वस्त्रनिष्पीडनविधिः इत्येते निरूप्यन्ते ॥

तृतीयेऽध्याये—होमविधिः, ब्रह्मयज्ञविधिः, संग्रहेण अवशिष्टमाध्याह्निकदेवपूजाभोजनसायंसन्ध्याशयनविधयः, भगवन्नामकीर्तनप्रशंसनमित्यादीनि कण्वाय नारदप्रोक्तानि वैष्णवोपयोगीनि साधु निरूप्यन्ते ॥

Noteworthy features.—This is quite a different work from that described above (38), which deals mainly with Vyavahāra. It has not been printed anywhere.

वक्तव्यविशेषः—

अध्यायत्रयपरिमितेयं स्मृतिराह्निकाचारनिर्णायिका अमुद्रिता दृश्यते । व्यवहारभागनिर्णायिका तु नारदस्मृतिरन्या मुद्रिता दृश्यते ॥

No. 40 (C 213).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Paper.
Size—$9\frac{5}{8} \times 4\frac{1}{2}$ inches.
Character—Dêvanāgari.
Folios—1-33.
Lines on a page—10.
Letters in a line—28.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

अथातो हिमशैलाग्रे देवदारुवनालये ।
व्यासमेकान्तमासीनमपृच्छन्नृषयः पुरा ॥
मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ॥

तच्छ्रुत्वा ऋषिवाक्यं तु सशिष्योऽग्न्यर्कसंनिभः ।
प्रत्युवाच महातेजाश्श्रुतिस्मृतिविशारदः ॥
न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम् ।
अस्मत्पितैव प्रष्टव्य इति व्यासः स्थितोऽवदत् ॥

End :—

आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् ।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥
चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापप्रणाशनम् ॥
एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम् ।
द्विनवत्या समायुक्तं धर्मशास्त्रस्य संग्रहः ॥
यथाध्ययनकर्माणि धर्मशास्त्रमिदं बुधाः ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिभिः ॥

Colophon:—

पाराशरस्मृतौ द्वादशोऽध्यायः ॥

Subject:—

This Smṛti is divided into 12 chapters, the first th dealing with Acāra and the remaining nine with Prāyaści The Acāra chapters of the work deal with the six d duties, *viz.*, Sandhya, bath, Japa, Homa, Vedic stu Worship of gods, Vaisvadeva and Honouring guests, proper means of livelihood for the Kshatriya, Vaisya Sudra; and the duties of the householder. The Prāy citta portion of the work deals with the expiations various kinds of sins such as, killing of beasts and bi partaking of food from Chandala, drinking wine, brah hatya, etc.

Noteworthy Features.—This work has been publis several times and with the voluminous gloss of Madh in Bombay, Calcutta and Madras.

प्रतिपाद्यविषयः—

आचारप्रायश्चित्तकाण्डद्वयात्मिकेयं स्मृतिः, तत्रादितोऽध्यायत्रयपरिमितमाचारकाण्डं, चतुर्थादिद्वादशाध्यायान्तं प्रायश्चित्तकाण्डमिति व्यवह्रियते । तत्राचारकाण्डे—

प्रथमाध्याये–शास्त्रोपोद्धातः, चतुर्युगधर्माः, षट्कर्माणि, यतिब्रतिनां भिक्षादानं, वैश्वदेवाकरणे दोषः, भोजननियमाः, अतिथिलक्षणं, क्षत्रियादिवर्णत्रयधर्माश्चाभिधीयन्ते । द्वितीयाध्याये–गृहस्थब्राह्मणधर्मा निरूप्यन्ते । तृतीयाध्याये–जननमरणाशौचं, श्राद्धविधानं, इत्येतानि प्रतिपाद्यन्ते ॥

द्वितीये प्रायश्चित्तकाण्डे—

चतुर्थाध्याये–उद्बन्धनमरणे पातकं, शववाहकादिनियमः, तदतिक्रमे प्रायश्चित्तं, पतितसंसर्गः, तत्प्रायश्चित्तं, ऋतावगमने गर्भपातने च पातकं, कर्मचण्डालता, कुण्डगोलकादयः, परिवित्त्यादिप्रायश्चित्तं, परिवेदने प्रतिप्रसवः, सहगमनप्रशंसा चाभिधीयन्ते । पञ्चमाध्याये–वृकश्वादिभिर्दंशे प्रायश्चित्तं, चण्डालादिभिर्हतस्याहिताग्नेर्विप्रस्य दहनविधिश्चाभिधीयते । षष्ठाध्याये–क्रौञ्चादिप्राणिहननप्रायश्चित्तं, शिल्पिकारुकादीनां वैश्यक्षत्रिययोः क्रियासक्तवैश्यशूद्रयोः विकर्मविप्रस्य च हनने प्रायश्चित्तं, चण्डलघातिनां ब्राह्मणादीनां प्रायश्चित्तं, चण्डालादिसंभाषणादौ प्रायश्चित्तं, चण्डालभाण्डकूपगतजलपानतदन्नभक्षणतत्संसर्गादौ प्रायश्चित्तं, ब्राह्मणादीनां व्रणे क्रिम्याद्युद्भवे प्रायश्चित्तं, अशुद्धान्नशुद्ध्यादिकं, चाभिधीयते । सप्तमाध्याये–दारुपात्रादिद्रव्याणां, सूतिकास्पर्शस्य रजस्वलातुरादीनां च शुद्धिरभिधीयते । अष्टमाध्याये–प्रायश्चित्ताङ्गव्रतं, परिषल्लक्षणं, प्रायश्चित्तिनो धर्माश्च निरूप्यन्ते । नवमाध्याये–गोहननादौ प्रायश्चित्तमभिधीयते । दशमाध्याये–अगम्यागमनादौ प्रायश्चित्तं प्रतिपाद्यते । एकादशाध्याये–अभोज्यान्नादिभोजने प्रायश्चित्तं, भोज्यान्ना दासादयः, पञ्चगव्यविधिः, अपचान्नभोजनप्रायश्चित्तं, अपचलक्षणं, द्विजावगोरणादौ प्रायश्चित्तमित्यादि निरूप्यते । द्वादशाध्याये–दुस्स्वप्नादौ स्नानं, विण्मूत्रादिप्राशने पुनस्संस्कारः, स्नानभेदाः, ब्राह्मणस्य वृषलतावाप्तिः, शूद्रीपाकनिषेधः, केचन भोजननियमाः रजस्वलाशुद्ध्यादि, ब्रह्महत्यादिमहापातकिनां प्रायश्चित्तं चेत्येतान्यभिधीयन्ते ॥

वक्तव्यविशेषः—

मुद्रितेयं स्मृतिः ॥

No. 41 (3534/6).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—228–255.
Lines on a page—8.
Letters in a line—40.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect–Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, Colophon etc.—As in No. 10.

No. 42 (2937/1).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—1–20.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End, Colophon etc.—As in No. 40.

No. 43 (2275/3).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—17 × 1⅝ inches.
Character—Grantha.
Folios—168-178.
Lines on a page—12.
Letters in a line—64.
Age of MS—Old.
Condition of MS—Not very good.
Correct or incorrect–Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, End and Colophon etc.—As in No. 40.

No. 44 (4748/1).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—16½ × 1½ inches.
Character—Telugu.
Folios—1-20.
Lines on a page—8.
Letters in a line—72.
Age of MS—Old.
Condition of MS—Good, but 20th folio is broken.
Correct or incorrect–Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

As in No. 40.

End :—

उपपातकशुद्धिस्स्यादेवं . . यणेन वा ।
पयसागममासेन पराकेणाथवा पुनः ।

एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम् ।
द्विनवत्या समायुक्तं धर्मशास्त्रं तु सङ्ग्रहः ।
यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा ॥
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिना ॥

Colophon :—

इति पाराशरे धर्मशास्त्रे काण्डद्वयपरिशेषधर्मकथनं नाम द्वादशोऽध्यायः ॥

Subject, etc. as in No. 40.

No. 45 (A 669/22).

पराशरस्मृतिः.

Paraașra Smṛtiḥ.

Author—Sage Parāśara
Substance—Paper.
Size—13×8⅝ inches.
Character—Telugu.
Folios—203–212.
Lines on a page—31.
Letters in a line—26.
Age of MS—Old.

Condition of MS—good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning—As in No. 40.

End:—

गावो वस्त्राणि चित्राणि भोजनं च विशेषतः ।
सपुत्रस्सहदारश्च कुर्याद्ब्राह्मणभोजनम् ॥
ब्राह्मणानां प्रसादेन ब्रह्महत्या विमुञ्चति ।
गावश्चैकादश तथा चतुर्विद्याय दक्षिणा ॥
एतत्पराशरेणोक्तं श्लोकपञ्चशताधिकम् ।
त्रिसप्ततिसमायुक्तं धर्मसारसमुच्चयम् ॥

Colophon:—

इति पराशरधर्मशास्त्रे द्वादशोऽध्यायः ॥
'पराशरकृतं पुण्यं पवित्रं पापनाशनम्।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥'
(इमं श्लोकं केषुचित्कोशेषु द्वादशाध्यायान्ते केचन पठन्ति)

Subject—As in No. 40.

Noteworthy Features.—The end is identical with that described under 5312 in the India Office Library Catalogue.

No. 46 (424/3).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{4}$ inches.
Character—Telugu.
Folios—1-26.
Lines on a page—6.
Letters in a line—58.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

अथातो हिमशैलाग्रे देवदारुवनाश्रमे ।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥
मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।
शौचाचारं यथावच्च वद सत्यवतीसुत ॥
तच्छ्रुत्वा स ऋषिर्वाक्यं सशिष्येभ्योग्निसन्निभः ।
प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥
यद्यहं सर्वधर्मज्ञस्तथाऽपि च वदाम्यहम् ।
अस्मत्पिता तु प्रष्टव्य इति व्यासस्तथाऽवदत् ॥

End :—

गावो वस्त्राणि चित्राणि भोजनं तु विशेषतः ।
सपुत्रः सहवृत्तश्च कुर्याद्ब्राह्मणभोजनम् ॥
ब्राह्मणानां प्रसादेन ब्रह्महत्या विमुञ्चति ।
गवां चैव शतं दद्याच्चातुर्विद्ये तु दक्षिणाम् ॥
एतत्पाराशरं शास्त्रं श्लोकपञ्चशतं तथा ।
सप्तसप्ततिसंयुक्तं धर्मसारसमुच्चयः ॥
पराशरकृतं पुण्यं प्रथितं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥

Colophon:—

इति पाराशर्ये धर्मशास्त्रे द्वादशोऽध्यायः ॥

Subject, etc.—As in No. 40.

No. 47 (2680/2).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—$19\frac{5}{8} \times 2\frac{1}{8}$ inches.
Character—Telugu.
Folios—131-140.
Lines on a page—11.
Letters in a line—94.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning—As in No. 40.

End :—

शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत् ॥

Subject—As in No. 40.

Noteworthy Features.—Begins as in 40 but ends with the 15th sloka of the 12th chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिरादितः प्रभृति द्वादशाध्यायीयपञ्चदशश्लोकान्तोपलभ्यते ॥

No. 47 A (1656/1).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara
Substance—Palm-leaf.
Size—10×1⅝ inches.
Character—Telugu.
Folios—49–50.
Lines on a page—11.
Letters in a line—40.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—incomplete.
Acquired or transcribed—Acquired.

Beginning :—

वसन्ते हिमशैलाग्रे देवदारुवनालये ।
व्यासमेकाग्रमासीनमपृच्छन् ऋषयः पुरा ॥
इत्यादि No. 40 कोशवत्.

End:—

चतुर्णामपि वर्णानामाचारो धर्मपालकः ।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥

Subject.—As in No. 40.

Noteworthy Features.—This MS. contains only the first 36 lines of the first chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन् प्रथमेऽध्याये 36 श्लोकमात्रं परिदृश्यते ।

No. 48 (2852/4).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—$19\frac{1}{2}\times1\frac{3}{4}$ inches.
Character—Grantha.
Folios—130-147.
Lines on a page—8.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Not so good.
Correct or incorrect-Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning.—As in No. 40.

End :—

प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम् ।
गोद्वयं दक्षिणां दद्यात्प्राजापत्यं समाचरेत् ॥
इतरेषामहोरात्रं पञ्चगव्येन शोधनम् ।
सपुत्रः सहभृत्यश्च कुर्याद्ब्राह्मणभोजनम् ॥
आकाशं वायुरग्निश्च क्षमा भूमिगतं जलम् ।
न दुष्यन्ति च दर्भाश्च यज्ञेषु चमसास्तथा ॥

Colophon:—

इति पाराशरे धर्मशास्त्रे दशमोऽध्यायः ॥

Subject.—As in No. 40.

Noteworthy Features.—This MS copy contains only the first ten chapters of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिरध्यायदशकान्तोपलभ्यते ॥

No. 49 (4487/9).

पराशरस्मृतिः.

Parāśara Smṛtiḥ.

Author—Sage Parāśara.
Substance—Palm-leaf.
Size—10 × 2 inches.
Character—Nāgari.
Folios—67–85.
Lines on a page—9.
Letters in a line—44
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning—As in No. 40.

End.—

प्राणायामे (प्रमापणे) प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः ॥
अन्यत्राङ्कनलक्ष्मभ्यां वाहने मोचने तथा ।
सायं सङ्गोपनार्थं च .... ॥

Subject.—As in No. 40.

Noteworthy Features.—This copy ends with the 27th sloka of the nineth chapter of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिः आदितः नवमाध्याये 27 श्लोकान्ता परिदृश्यते (62–67) आदौ तावत् माधवीयतद्व्याख्योपोद्घातश्लोकाः परिदृश्यन्ते ॥

No. 50 (C 658).

पराशरस्मृतिव्याख्या

Parāśara Smṛti Vyākhyā. (Ācāra Kandaḥ)

Author—Mādhavācārya.
Substance—Paper.
Size—$8\frac{3}{8} \times 6\frac{1}{8}$ inches.
Character—Devanāgari.
Folios—1-273.
Lines on a page—15.
Letters in a line—30.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
वागीशो यस्य वदने लक्ष्मीर्यस्य च वक्षसि ।
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥
सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनतीर्थसङ्गनिपुणस्सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम् ॥
सत्यैकव्रतपालको द्विगुणधीस्त्र्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढस्सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः
स्मार्तोच्छ्रायधुरन्धरो विजयते श्रीबुक्कपृथ्वीपतिः ॥
इन्द्रस्याङ्गिरसो नलस्य सुमतिश्शैब्यस्य मेधातिथि-
र्धौम्यो धर्मसुतस्य वैन्यनृपतेस्स्वौजा निमेर्गौतमिः ।
प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ॥
प्रज्ञामूलमही विवेकसलिलैस्सिक्ता बलोपघ्निका
मन्त्रैः पल्लविता विशालविटपा सन्ध्यादिभिष्षड्गुणैः ।

शक्त्या कोरकिता यशस्सुरभिता सिद्ध्या समुद्यत्फला
संप्राप्ता भुवि भाति नीतिलतिका सर्वोत्तरं माधवम् ॥

यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजकुलं यस्य सर्वज्ञस्स हि माधवः ॥

श्रीमती जननी यस्य सुकीर्तेर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥

स माधवस्सकलपुराणसंहिताप्रवर्तकस्स्मृतिसुषुमा पराशरः ।
पराशरस्मृतिजगदीहितासये पराशरस्मृतिविवृतौ प्रवर्तते ॥

पराशरस्मृतिः पूर्वैर्न व्याख्याता निबन्धृभिः ।
मयाऽतो माधवार्येण तद्व्याख्यायां प्रवर्त्यते ॥

ननु नेयं स्मृतिर्व्याख्यातुमर्हति, तत्प्रामाण्यस्य दुर्निरूपत्वात् । यत्तु वेदप्रामाण्यकारणं जैमिनिना सूत्रितं, 'तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' इति । न तत्पौरुषेयेषु मूलप्रमाणसापेक्षेषु योजयितुं शक्यते ॥

End :—

"नित्यकाम्ययोरेकदेवताकयोस्सन्निपाते काम्येनैव नित्यसिद्धिः । तदुक्तं स्मृतिसङ्ग्रहे—

काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिध्यति । इति ॥

यत्राशौचविधानमुक्तमजहत्स्वार्थैकयुक्त्या दृशा
प्रोक्तं यत्र च सङ्गृहीतिवपुषा श्राद्धं समृद्धिप्रदम् ।
अध्यायत्रयबाह्यनिर्णयविदां तार्तीयमार्तिच्छिदं
सोऽयं व्याकुरुत स्वतन्त्रमहिमा मन्त्रीश्वरो माधवः ॥

Colophon:—

इति श्रीमहाराजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-
बुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ
पराशरस्मृतिव्याख्यायां माधवीयायां
तृतीयोऽध्यायः ॥
आचारकाण्डं समाप्तम् ॥

Subject :—

This is an extensive commentary on the first three chapters of Parāśara Smṛti by Madhavacharya, brother of Sayana.

प्रतिपाद्यविषयः—

अध्यायत्रयपरिमिताचारकाण्डस्य पाराशरस्य तत्तत्स्थलसंग्राह्य-स्मृतिनिबन्धनादिपरामर्शपुरस्सरं प्रणीता समीचीना विस्तृता व्याख्येयम् ॥

तत्राद्येऽध्याये—अस्याः पराशरस्मृतेः व्याख्याने शङ्कापरिहारौ, पाराशरशास्त्रोपोद्घातः, पराशरशब्दनिरुक्तिः, तत्तद्युगधर्माः, साधारणासाधारणधर्माः, धर्मस्वरूपं, कल्पस्वरूपतद्भेदौ, प्राकृतप्रलयमायादिवर्णनं, परमाणुवादखण्डनं, अचिन्त्याद्भुतेश्वरशक्तिनिरूपणं, त्रयीनिर्णायकाः, स्मृतिप्रणेतारः, वेदापौरुषेयत्वं, धर्मप्रवर्तकाः, प्रतियुगं धर्मवैलक्षण्यं, तत्तद्युगसामर्थ्यं, कलियुगधर्माः, कलिनिषिद्धानि, आचारस्य श्रेयःप्रदत्वं, अध्यापनं, अध्ययनविधिः, अध्ययननियमाः, अनध्यायाः, यजनयाजनदानप्रतिग्रहाः, देवतास्वरूपं, अतिथिलक्षणं, हुतशेषभोजनं, मूत्रपुरीषोत्सर्गः, शौचं, गण्डूषाचमनदन्तधावनविधयः, दर्भाहरणादिविधिः, स्नानं, वस्त्रपरिधानं, वस्त्रलक्षणं, ऊर्ध्वपुण्ड्रविधिः, मृत्तिकास्नाननैमित्तिककाम्यक्रियाङ्गस्नानानि, सन्ध्याविधिः, होमविधिः, देवपूजा, वेदाभ्यासः, ब्रह्मयज्ञतर्पणादिविधिः, पञ्चयज्ञाः, भिक्षादानं, वैश्वदेवाकरणे दोषः, भोजनविधिः, तन्नियमाः, सायंसन्ध्यावैश्वदेवादि, शयनविधिः, राजधर्माः, राज्ञो दिनचर्या, शूद्रधर्माः, इत्येते सविस्तरं प्रतिपाद्यन्ते ॥

द्वितीयेऽध्याये—ब्राह्मणस्य कृषिजीवनं, आश्रमाः, गर्भाधानादिसंस्काराः, उपाकर्मोत्सर्जनादि, ऐकाश्रम्यविचारः, नैष्ठिकब्रह्मचारिधर्माः, वानप्रस्थधर्माः, यतिधर्माः, आश्रमचतुष्टयावान्तरभेदाः, इत्येते निरूप्यन्ते ॥

तृतीयेऽध्याये—जननमरणयोर्दशाहाद्याशौचनिर्णयः, शवनिर्हरणानुगमनादि, दाहोदकपिण्डदानादि, आशौचिधर्माः, श्राद्धस्वरूपं, तद्भेदाः, श्राद्धयोग्यदेशाः, श्राद्धकालाः, श्राद्धार्हब्राह्मणादि, निमन्त्रितब्राह्मणकर्तव्यं, श्राद्धदिनकृत्यं, श्राद्धार्हानर्हद्रव्याणि ब्राह्मणोपवेशनासनार्घ्यदानादि, अग्नौकरणं, परिवेषणं, दातृभोक्तृनियमाः, पिण्डनिर्वपणदक्षिणादानमध्यमपिण्डाशनादि, प्रत्याब्दिकसपिण्डीकरणश्राद्धे, वृद्धिश्राद्धं, श्राद्धकर्तारः, मातामहादिश्राद्धाधिकारः, इत्यादयो निरूप्यन्ते ॥

Noteworthy Features.—This work, known generally as a commentary on the Smṛti of Parāśara, is really an authoritative digest on civil and religious law.

No. 51 (1760).

पराशरस्मृतिव्याख्या (आचारकाण्डः).

Parāśara Smṛti Vyākhyā. (Ācāra Kāndaḥ).

Author—Mādhavācārya.
Substance—Palm-leaf.
Size—14 × 1⅜ inches.
Character—Nāgari.
Folios—1–140.
Lines on a page—8.
Letters in a line—68.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning—As in No. 50.

End:—

परमहंसा नाम एकदण्डधराः कन्थाकौपीनवाससोऽव्यक्तलिङ्गा अनुन्मत्ता उन्मत्तवदाचरन्तः त्रिदण्डकमण्डलुशिक्यपत्रजलपवित्र-पादुकासनशिखायज्ञोपवीतत्यागिनः शून्यागारदेवगृहनिवासिनः। न तेषां धर्मो नायं धर्मो न सत्यं नापि चानृतं सर्वसहाः सर्वसमाः समलोष्टाश्मकाञ्चनाः यथोपपन्नचातुर्वर्ण्यभैक्षचर्यं चरन्त आत्मानं मोक्षयन्ते। तेषामुपशमो · · · · ॥

Subject.—As in No. 50.

Noteworthy Features.—This is an incomplete copy of the work and contains only the first two chapters.

वक्तव्यविशेष :—

कोशेऽस्मिन्नियं स्मृतिव्याख्या समग्रप्रायद्वितीयाध्यायान्ता परि-दृश्यते ॥

No. 52 (2383).

पराशरस्मृतिव्याख्या (आचारकाण्डः).

Parāśara Smṛti Vyākhyā (Ācāra Kāndaḥ).

Author—Madhavācārya.
Substance—Palm-leaf.
Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—1-197.
Lines on a page—8.
Letters in a line—80.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning—As in No. 50.

End:—

तथा च शातातपः—

मृता याऽनुगता नाथं सा तेन सहपिण्डताम् ।
अर्हति स्वर्गवासेऽपि यावदाभूतसम्प्लवम् ॥ इति ।

यमोऽपि—

पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्मृतम् ।
सा मृताऽपि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥ इति ।

अत्रैकशब्दः पितामह्यादिविकल्पव्यावृत्त्यर्थः । सपिण्डीकरणस्य पार्वणैकोद्दिष्टरूपत्वात् । एतत्सर्वं ब्राह्मादिविवाहेषु द्रष्टव्यम् ॥

आसुरादि .... ॥

Subject.—As in No. 50.

Noteworthy Features.—This copy contains all the three chapters of the work with only a few portions missing at the end.

वक्तव्यविशेषः—

कोशेऽस्मिन् इयं व्याख्या तृतीयाध्यायान्त्यभागान्ता दृश्यते ॥

No. 53 (3368).

पराशरस्मृतिव्याख्या.

Parāśara Smṛti Vyākhyā (Âcāra Kandaḥ).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$16\frac{3}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgari.
Folios—1-104.
Lines on a page—6.
Letters in a line—60.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

प्रथमद्वितीयाभ्यामध्यायाभ्यां चातुर्वर्ण्याश्रमास्साक्षात्प्रतिपादिताः । आश्रमधर्माश्च सूचिताः । तेषु धर्मेषु शुद्धस्यैवाधिकारः 'शुचिना कर्म कर्तव्यम्' इति स्मृतेः ॥

End:—

यद्यप्येकदेवताकश्राद्धद्वयमेकस्मिन्नहनि न युक्तम्, एकानुष्ठाने नेतरप्रयोजनस्यापि प्रसङ्गात्सिद्धेः । तथाऽपि नैमित्तिकान्यनेकानि वचनबलादनुष्ठेयानि । तथा च जाबालिः—

श्राद्धं कृत्वा तु तस्यैव पुनश्श्राद्धं न तद्दिने ।
नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयम् । इति ॥

नित्यकाम्ययोरेकदेवताकयोस्सन्निपाते काम्येनैव नित्यसिद्धिः । तदुक्तं स्मृतिसङ्ग्रहे—

काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिध्यति ।

Colophon :—

इति श्रीराजाधिराज-राजपरमेश्वरवैदिकमार्गप्रवर्तक-श्रीवीरबुक्कभूपाल-साम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृति-व्याख्यायां तृतीयोऽध्यायः ॥

Subject :—

This contains the commentary on the third chapter of the Smriti of Parasara, dealing with the purificatory ceremonies relating to birth and death and the details regarding Srāddha.

प्रतिपाद्यविषयः—

अत्र तृतीयेऽध्याये जननमरणाशौचादौ शुद्धिकालाः, श्राद्धयोग्यदेशकालाधिकारिनियमादयो विषयाश्श्राद्धोपयोगिनः सप्रमाणं निरूप्यन्ते ॥

Noteworthy Features.—This is an incomplete copy of this work containing only the third chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन् तृतीयाध्यायमात्रस्य व्याख्या दृश्यते ॥

No. 54 (1621/2).

पराशरस्मृतिव्याख्या.

Parāśara Smṛti Vyâkhyā (Âcāra Kandaḥ).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$17\frac{1}{4} \times 1\frac{3}{8}$ inches.
Character—Nāgari.
Folios—1-155.
Lines on a page—8.
Letters in a line—90.

Age of MS—Old.
Condition of MS—Not so good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

Beginning, End, Colophon and Subject—As in No. 50.

Noteworthy Features.—Some eight leaves of the MS contain matter quite unconnected with the work. Seven of them contain details about the nature, repetition and meditation of the mantras of Saubhāgya Vidyêsvari, Bagalāmbā, Laghusyamalāmba, Vārabi, etc. The leaf at the end contains in a nut-shell rules regarding the Bhiksha of the yatis or ascetics.

No. 55(68/4).

पराशरस्मृतिव्याख्या.

Parāśara Smṛti Vyākhyā (Âcāra Kandaḥ).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—13 × 1⅜ inches.
Character—Nāgari.
Folios—1-24.
Lines on a page—6.
Letters in a line—50.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

"द्वितीयेऽप्यध्याये स्फुटमभिहितो जीवनकृतेरुपायः कृष्यादिः पुनरथ समस्ताश्रमगताः। गरीयांसो धर्माः किमपि विवृतास्त्वाश्रमसदां (तमेवं व्याकार्षीन्महितधिषणो माधवविभुः)

प्रथमाद्वितीयाभ्यामध्यायाभ्यां चातुर्वर्ण्यधर्मास्साक्षात्प्रतिपादिताः। आश्रमधर्माश्च सूचिताः। तेषु धर्मेषु शुद्धस्यैवाधिकारः 'शुचिना कर्म कर्तव्यम्' इति स्मृतेः। सा च शुद्धिर्यद्यपि पुरुषस्य स्वाभाविकी। तथाऽपि केनचिदागन्तुकेनाशौचाख्येन दोषरूपेण पुरुषगतातिशयेन कश्चित्कालं प्रतिबध्यते। तच्चाशौचं कालेयत्तास्नानापनोद्यम्। अतस्तृतीयेऽप्यध्याये तत्प्रतिपिपादयिषुरादौ प्रतिबन्धापगमेनोत्तम्भितां शुद्धिं प्रतिजानीते—

अतश्शुद्धिं प्रवक्ष्यामि जनने मरणे तथा। इति ॥

End:—

अनुगमनविधिस्तु याज्ञवल्क्येन दर्शितः—

आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः।

यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना।

स दग्धव्य उपेतश्चेदाहिताग्न्यावृताऽर्थवत्'। इति।

ऊनद्विवर्षादितरः संपूर्णद्विवर्षो मृतो ज्ञातिभिः

Subject:—

As in 50.

Noteworthy Features.—This contains the commentary on only 45 slokas of the third chapter.

प्रतिपाद्यविषयः—

कोशेऽस्मिन् दृश्यमाने तृतीयेऽध्याये—आशौचस्वरूपं, जननमरणयोराशौचं, विप्राणां त्र्यहाशौचप्रतिपादकपाराशरवचनस्य स्मृत्यन्तरानुगुण्येन समानोदकविषयकत्वं, तथा क्षत्रियाणां द्वादशाहाशौचप्रतिपादकस्यापि तपोविद्यान्यूनक्षत्रियविषयकत्वं, वृत्तस्वाध्यायापेक्षाशौचह्रासस्य कलियुगवर्जनीयत्वं, वर्णक्रमेण सामान्यत अशौचं, आशौचे सन्ध्याग्निहोत्रयोरनिवृत्तिः, तत्र विशेषः, जननाशौचे सपिण्डाङ्गस्पर्शे दोषाभावः, वर्णक्रमेण जननाशौचं, जन्मदाख्यदेवतापूजा, तस्यां च नाशुद्धिः, एकाहाद्याशौचसङ्कोचप्रतिपादकानां दशाहाशौचबाधकत्वाभावः, तेषामश्वस्तनिकादिविषयकत्वं, नामधारकविप्राशौचं, तत्स्वरूपं, उत्तमवर्णेन हीनवर्णायामुत्पन्नानां उत्तमवर्णसंबन्धिजननमरणयोराशौचं, भिन्नजातीयविषयाशौचस्यावधिः, सजातीयेषु सापिण्ड्यावधिः, पञ्चमपुरुषादावाशौचसङ्कोचः, तत्र व्यवस्था च, क्वचिन्मृताशौचापवादः, दुर्मृतानां दाहादिनिषेधः, तेषां वत्सरादूर्ध्वं नारायणबलिविधिपूर्वकमौर्ध्वदैहिककरणं, सर्पहते विशेषः, प्रमादमृताशौचम्, भृग्वग्निमरणादौ विशेषः, देशान्तरमरणे आशौचं, देशान्तरलक्षणं, बालादिमरणाशौचं, संन्यस्तमरणाशौचं, अतिक्रान्ताशौचं, तत्र पित्रादौ विशेषः, अनुपनीतातिक्रान्तमरणाशौचातिक्रान्तजननाशौचयोरभावः, अन्तर्दशाहे श्रवणे शेषाहोभिर्विशुद्धिः, देशान्तरमृतस्य मरणदिवसापरिज्ञाने विधिः, अजातदन्तानां संस्कारादिविधिः, गर्भपातादौ सपिण्डानामाशौचं, गर्भस्रावपातयोर्जनन्या आशौचं, गर्भस्रावपातलक्षणं, बालादीनां दाहादिनाऽऽशौचतारतम्यं, वयोऽवस्थाविशेषेणाशौचं, कन्यामरणविषयाशौचं, मातृष्वस्राद्याशौचं, अग्निहोत्रिब्रह्मचारिणामाशौचाभावः, शिल्पिकारुकादीनामाशौचाभावः, सूतिकासंपर्काशौचं, यज्ञादौ सङ्कल्पितद्रव्यस्याशुद्ध्यभावः, सन्निपाताशौचं, युद्धहतप्रशंसा, तत्र सापिण्डानामेकाहमाशौचं, अनाथब्राह्मणशववहनप्रशंसा, तत्र सद्यश्शुद्धिश्च, प्रेतवहने शुद्धिः, अनुगमनाशौचं, निहीनजात्यनुगमनाशौचं, द्विजानां शूद्रशवानुगमननिषेधः, आतुरव्यञ्जनाशौचं, अनुगमनविधिः, इत्येते निरूप्यन्ते। इत ऊर्ध्वमवशिष्टा आशौचविषयाश्च C 658 तमकोशे द्रष्टव्याः ॥

No. 56 (2711).

पराशरस्मृतिव्याख्या (प्रायश्चित्तकाण्डः).

Parāśara Smṛtivyākhyā (Prāyaschitta Kāndaḥ).

Author— Mādhavāchārya.	Letters in a line—78.
Substance—Palm-leaf.	Age of MS—Old.
Size—14 × 1⅞ inches.	Condition of MS—Good.
Character—Telugu.	Correct or incorrect-Correct.
Folios—1-81.	Complete or incomplete—Incomplete.
Lines on a page—12.	

Beginning:—

सोऽहं प्राप्य विवेकतीर्थपदवीं—श्रीकण्ठमभ्याहतम् ॥
सत्यैकव्रत .... श्रीबुक्कणक्ष्मापतिः ॥
इन्द्रस्याङ्गिरसो .... मन्त्री तथा माधवः ॥
प्रज्ञामूलमही .... सर्वोत्तरं माधवम् ॥
यस्य बौधायनं .... सहोदरौ ॥
स माधवः .... पराशरस्मृतिविवृतौ प्रवर्तते ॥

आचारकाण्डरूपेणातीतेनाध्यायत्रयेण विधिनिषेधौ दर्शितौ । अथेदानीं तदुल्लङ्घननिमित्तपातित्यपरिहारोपायप्रतिपादकप्रायश्चित्तकाण्ड आरभ्यते । प्रायश्चित्तशब्दश्च रूढ्या योगेन च पापनिवर्तनक्षमधर्मविशेषमाचष्टे ॥

End:—

इदं कामकारविषयम् ।
अकामतस्तु पिबतो मेहतश्चैव भुञ्जतः ।
प्राणायामत्रिकं षट्कं नक्तं च त्रितयं क्रमात् ॥
भोजनानन्तरमाचमनमकृत्वा आसनादुत्थाने आश्वमेधिके प्रायश्चित्तमुक्तम्—
यदुत्तिष्ठत्यनाचान्तो भुक्तवानासनात्ततः ।
सद्यः स्नानं प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत् ॥ इति ॥
अपाङ्क्त्यपङ्क्तिभोजने मार्कण्डेय आह—
अपाङ्क्त्यस्य यः कश्चित् पङ्क्तौ .   जोत्तमः ॥

D.C.M.

End:—

इति हिंसादोषकर्मफलानि । अथापेयपानाभक्ष्यभक्षणकर्मविशेषा-द्योनिविशेषः । तत्र शिवधर्मोत्तरे—

क्रमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम् ।
सुरापः प्राप्नुते योनिं पूर्वकर्मानुसारतः ॥

इति । उमामहेश्वरसंवादे—

मद्यव्यसनिनो ये तु ये मद्यं सेवयन्ति च ।
शालां तु कारयेद्यस्तु मद्यपानं ददाति यः ॥
मद्यविक्रयिणो ये च मद्यं ये क्रीणयन्ति च ।
पिबन्ति ये नरा देवि शे . . . . ॥

Subject.—As in No. 56.

Noteworthy Features.—This is also an incomplete manuscript copy of the work beginning with Chapter IV and running up to the exposition of Karmavipāka in Chapter XII.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं व्याख्या प्रायश्चित्तकाण्डादिभूततुरीयाध्यायप्रभृति द्वादशाध्यायान्ते कर्मविपाकनिरूपणारम्भपर्यन्ता दृश्यते ॥

No. 58 (3001/2).

पराशरस्मृतिव्याख्या (परिशिष्टकाण्डः).

Parāśara Smṛtivyākhyā (Praiśiṣta Kāndaḥ).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—237-281.
Lines on a page—10.
Letters in a line—72.
Age of MS—Old.

Condition of MS—Good.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.

Beginning:—

आचारकाण्डे त्रिभिरध्यायैर्यावन्त आचाराः प्रतिपादिताः, प्रायश्चित्तकाण्डे चाष्टभिरध्यायैर्यानि प्रायश्चित्तान्यभिहितानि, तेभ्योऽतिरिक्तानां परिशिष्टानां केषां चिदाचाराणां प्रायश्चित्तानां च विधानाय द्वादशाध्याय आरभ्यते। तत्रादौ दुस्स्वप्ननिमित्तस्नानमाह—

दुःस्वप्नं यदि पश्येत्तु वमने क्षुरकर्मणि।
मैथुने प्रेतधूमे च स्नानमेव विधीयते ॥ इति ॥

स्वप्नो द्विविधः दुस्स्वप्नस्सुस्वप्नश्च ॥

End:—

यदि जपादीनां प्रायश्चित्तत्वमङ्गीकृत्य प्रारब्धकर्मनिवृत्तिरभ्युपेयते, यदि वा तदनङ्गीकारेण फलमात्रप्रतिबन्धः, सर्वथाऽपि विहितजपादौ विस्रम्भेण .... सिध्यति। यदा भोगैकनिवर्त्यत्वशङ्कायुक्तेष्वपि प्रारब्धफलेष्वीदृशः प्रतीकारविस्रम्भः, तदा नरकफलेषु सञ्चितेषु कर्मसु प्रायश्चित्तप्रवृत्तिविस्रम्भोऽस्तीति किमु वक्तव्यम्। तस्माद्यथो......... ॥

Subject:—

This serves as an appendix to the work and deals with the special purificatory acts pertaining to Acārās which have not been dealt with in the first eleven chapters.

प्रतिपाद्यविषयः—

दुःस्वप्नादौ स्नानं, विण्मूत्रादिप्राशने पुनस्संस्कारः, स्नानभेदाः, ब्राह्मणस्य वृषलताप्राप्तिः, शूद्रीपाकनिषेधः, भोजननियमाः, रजस्वलाशुद्ध्यादि, ब्रह्महत्यादिमहापातकानां प्रायश्चित्तं, इत्यादीन्येकादशाध्यायोक्तातिरिक्तानि आचारविशेषप्रायश्चित्तान्यत्र परिशिष्टरूपद्वादशाध्याये संगृहीतानि सविस्तरं व्याख्यातानि दृश्यन्ते ॥

वक्तव्यविशेषः—

कोशेऽस्मिन् परिशिष्टकाण्डरूपो द्वादशोऽध्यायो व्याख्यातो दृश्यते। स चासमग्रः ॥

No. 59 (3378).

पराशरस्मृतिव्याख्या.

Parāśara Smṛti Vyākhyā.

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$16\frac{5}{8}'' \times 1\frac{3}{8}''$ inches.
Character—Telugu.
Folios—28-214.
Lines on a page—7.
Letters in a line—50.
Age of MS—Old.

Condition of MS—Good but a few folios at the end are broken.
Complete or incomplete—Incomplete.
Correct or incorrect–Correct.
Acquired or transcribed—Acquired.

Beginning:—

इति श्री महाराजाधिराज . . . . माधवीयायां पञ्चमाध्यायः ॥

प्रकीर्णकप्रायश्चित्तप्रसङ्गादाहिताग्निसंस्कारः पञ्चमाध्याये निरूपितः। अथ षष्ठाध्याये प्रकृतमेव प्रायश्चित्तमनुवर्तयिष्यमाणो मलिनीकरणसङ्कीर्णोपपातकानां प्रायश्चित्तानि प्राधान्येन विवक्षुः प्रथमं प्रतिजानीते—

अतः परं प्रवक्ष्यामि प्राणिहत्यासु निष्कृतिम्।
पराशरेण पूर्वोक्तां मन्वर्थेऽपि च विस्तृताम् ॥ इति ॥

End:—

अस्य शास्त्रस्यार्थानुष्ठानप्रधानत्वात्तस्य स्वर्गं प्रत्याकिञ्चित्करत्वमाशङ्क्य वेदाध्ययनवत्स्वर्गसाधनत्वमाह—

यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिभिः ॥

इति। निगदव्याख्यानमेतत् ॥

Colophon :—

इतिश्रीमहाराजाधिराज–राजपरमेश्वर–वैदिकमार्गप्रवर्तक–श्रीबुक्कणभूपसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां माधवीयायां द्वादशोऽध्यायः ॥

समाप्तोऽयं माधवीयाख्यपराशरस्मृतिव्याख्याने प्रायश्चित्तकाण्डो द्वितीयः ॥

अध्यायेऽत्रावशिष्टं समुदितमुभयोः काण्डयोर्द्वादशे स्यात्
प्रायश्चित्तं यदस्मिन्ननुपदमगमत्पातकादौ रहस्ये ।
अन्यत्सौम्यादिकृच्छ्रं सुविहितफलदं कर्मणां यो विपाकः
सर्वं भावोपलब्धं स्मृतिहृदयविदा व्याकृतं माधवेन ॥

Subject :—

This contains the commentary of Mādhavācharya on seven chapters of the Smṛiti of Parāśara, from the 6th up to the end of the 12th chapter.

प्रतिपाद्यविषयः—

आचारप्रायश्चित्तपरिशिष्टकाण्डैस्त्रिधा विभक्तायाः पाराशरस्मृतेरियं माधवीया व्याख्या—

तत्राचारकाण्डः प्रथमादित्रिभिरध्यायैर्विभक्तः, प्रायश्चित्तकाण्डस्तु तुरीयाद्येकादशान्तैरष्टभिरध्यायैः, एकेन परिशिष्टेन द्वादशेनाध्यायेनेतीयं स्मृतिर्द्वादशभिरध्यायैः परिपूर्णावयवा दृश्यते ॥

अत्र च षष्ठेऽध्याये—मलिनीकरणसंकीर्णोपपातकानां प्रायश्चित्तं, अन्नरसशुद्ध्यादिकं च विम्रियते ॥

सप्तमेऽध्याये—दर्वीयक्षपात्राद्यवशिष्टद्रव्यशुद्धिर्निरूप्यते ।

अष्टमनवमयोः—गोवधप्रायश्चित्तं विविच्यते ।

दशमे—अगम्यागमनप्रायश्चित्तं निरूप्यते ।

एकादशे—अभोज्यभोजनादौ प्रायश्चित्तमभिधीयते ।

द्वादशेऽध्याये—पूर्वोत्तरकाण्डशेषभूतानि आचारप्रायश्चित्तानि संगृह्यन्त इति मूलोक्तानां तत्र तत्र प्रमाणान्तरादिप्रदर्शनपुरस्सरं विवरणं दृश्यते। तथा मूलानुक्तानां कृच्छ्रादिव्रतानां कर्मविपाकस्य च निरूपणमत्र कृतमिति ॥

वक्तव्यविशेषः—

अत्र कोशे व्याख्येयं षष्ठाध्यायमारभ्य द्वादशाध्यायान्ता दृश्यते ॥

No. 60 (2275/2).

* पराशरस्मृतिव्याख्या (सङ्ग्रहमाधवीयम्).

* Parāśara Smṛti Vyākhyā (Saṅgraha Mādhavīyam).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{7}{8}$ inches.
Character—Grantha.
Folios—211–266.
Lines on a page—12.
Letters in a line—60.
Age of MS—Old.
Condition of MS—Good.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Correct.

Beginning :—

'श्रुतिं पश्यन्ति मुनयः स्मरन्ति च तथा स्मृतिम् ।
तस्मात्प्रमाणमुभयं प्रमाणैः प्रमितं भुवि ॥
योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः ।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ इति ॥

पराशरस्मृतावस्यां ग्रन्थक्लृप्तिर्विविच्यते—

द्वे काण्डे द्वादशाध्यायाः श्लोका अष्टोनषट्शतम् ।
द्वाचारे त्रयोऽध्यायाः प्रायश्चित्ते नवेरिताः ॥
अवतारश्चतुर्वर्णधर्मौ साधारणेतरौ ।
शिष्टाचाराह्निके तत्र धर्मौ साधारणौ मतौ ॥
षट्कर्मक्षितिरक्षाद्या वर्णासाधारणास्स्मृताः ।
आचारे प्रथमेऽध्याये त एतेऽर्थाः प्रकीर्तिताः ॥
कृष्यादिजीवनोपायो द्वितीयाध्याय ईरितः ।
चतुराश्रमधर्मास्तु सूचिता आश्रमोक्तितः ॥
उक्तौ तृतीय आशौचश्राद्धादीनां च सङ्ग्रहौ ।
अध्यायत्रयगा अर्थाः प्रोक्ता आचारकाण्डगाः ॥

End :—

तदेवं भगवान् पराशराचार्यः काण्डद्वयेनाचारप्रायश्चित्तप्रपञ्चमभिधाय शास्त्रमुपसंहरति ॥

एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम् ।
द्विनवत्या समायुक्तं धर्मशास्त्रस्य सङ्ग्रहः ॥ इति ॥
पाराशराध्ययनस्य वेदाध्ययनवत् स्वर्गसाधनत्वमाह --
यथाऽध्ययनकर्माणि धर्मशास्त्रमिदं तथा ।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गगामिभिः ॥ इति ॥

Colophon:—

इति महाराजाधिराज-राजपरमेश्वर-वैदिकमार्गप्रवर्तक-श्रीबुक्कणभूपाल-
साम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृति-
व्याख्यायां माधवीयायां द्वादशोऽध्यायः ॥
काण्डद्वयं समाप्तम् ॥

Subject:—

This is a brief commentary by Mādhava on the contents of the Smṛti of Parāśara as in No. 40.

प्रतिपाद्यविषयः—

No. 40 तमे पराशरस्मृतिकोशे दर्शितानामंशानां माधवार्यकृतं सङ्ग्रहरूपं व्याख्यानमिदम् ॥

वक्तव्यविशेषः—

एतत्कृतमेव विस्तृतमप्यन्यद्दृश्यते । अमुद्रितं चेदम् ॥

No. 61 (2490).

* पराशरस्मृतिव्याख्या (सङ्ग्रहमाधवीयम्).

* Parāśara Smṛti Vyākhyā (Saṅgraha Mādhavīyam).

Author—Mādhavāchārya.
Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{8}$ inches.
Character—Grantha.
Folios—1-94.
Lines on a page—7.
Letters in a line—52.
Age of MS—Old.
Condition of MS—Good.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.

Beginning, end, colophon, etc.—as in No. 60.

No. 62 (2765/1)

* पराशरस्मृतिव्याख्या लघुहितधर्माख्या.

Parāśara Smṛti Vyākhyā. Laghuhitadharmākhyā.

Author—Kāmesvara Vasantha Somayāji.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Telugu.
Folios—1-113.
Lines on a page—7.
Letters in a line—58.
Age of MS—Old.
Condition of MS—Not good (Worm-eaten here and there).
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.
Correct or incorrect—Not so very correct.

Beginning :—

सुमुखाय नमस्तुभ्यं सुजनावनदीक्षिणे ।
यत्कटाक्षं प्रतीक्षन्ते ब्रह्माद्याः कार्यसिद्धये ॥
पराशरोक्तमार्गेण हितधर्मो वितन्यते ।
कलौ युगेऽत्र सुकरः श्रीकामेश्वरयज्वना ॥

Noteworthy Features.—It is an incomplete copy containing only the chapter on Vyavahāra.

वक्तव्यविशेषः—

कोशेऽस्मिन् व्यवहाराध्यायमात्रं दृश्यते। मुद्रिता चेयं स्मृतिः॥

No. 94 (B 779).

याज्ञवल्क्यस्मृतिः बालक्रीडाख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Bālakrīḍākhya Vyākhyāyutā
(Vyavahārādhyāyaḥ)

Author—Viśvarūpa.
Substance—Paper.
Size—8 × 6⅛ inches.
Character—Telugu.
Folios—1-104.
Lines on a page—12.
Letters in a line—24.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—complete.
Acquired or transcribed—Acquired.

Beginning:—

विश्वरूपकृतविवरणबालक्रीडाव्याख्या.

श्रियस्समुदयं प्राप्तुमिच्छता विजिगीषुणा समृद्ध्यै राज्ञा प्रयत्नादमित्रराज्यान्याच्छिद्य स्वराज्यं विवर्धनीयमित्युक्तम्। तत्रापि कष्टतमाः खल्वरयः कापटिककुयन्त्रव्यवहारिणो दस्यवः। तेभ्योऽपि राष्ट्रं रक्षणीयमित्येतदप्युक्तम्। अथेदानीं तदुद्धरणप्रकारविवेकार्थं व्यवहारनिरूपणं प्रस्तौति—

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैस्सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥

End:—

सर्वं चैतत् श्रुतिस्मृत्यनुसारात् न्याय्यमेवेत्यवसेयामिति॥
प्रथमोदयानुरक्तो निखिलं महीमण्डलं निजं कृत्वा।
पालयति सततमुर्वीमिति बलवानेष नृपसविता॥

इति निरस्तनिजव्यसनक्रमः
कृतविपक्षचरित्रविपर्ययः ।
नृपतिराशु समुद्धृतकण्टको
हरिरिवेष्टतमायतनं श्रियः ॥

Colophon:—

इति याज्ञवल्कीये परमभट्टारकप्रणीते धर्मशास्त्रे विश्वरूपकृत-
विवरणबालक्रीडायां द्वितीयोऽध्यायः ॥

Subject:—

Comments on the Vyavahāra section of the Smṛti of Yājñavalkya.

प्रतिपाद्यविषयः—

विश्वरूपाचार्येण प्रणीतायामस्यां बालक्रीडाख्यायां व्याख्यायां याज्ञवल्क्यस्मृतेः सप्रतीकधारणं पदार्थवाक्यार्थावुपवर्ण्येते ॥

Noteworthy Features.—This commentary of Viśvarūpa known as Bālakrīda seems to be the earliest of the commentaries on the Smṛti of Yājñavalkya. It is extremely meagre on the Vyavahāra section, but voluminous on the Ācāra and Prāyaścitta sections and merits the epithet, Vikata, that has been applied to it by Mitākṣarā. On various considerations Viśvarūpa has been assigned to the beginning of the 9th century A.D.

वक्तव्यविषयः—

इयं च विश्वरूपाचार्यप्रणीता व्याख्या मिताक्षराख्यव्याख्यापेक्षया प्राचीना, मिताक्षरायां विज्ञानयोगीश्वरीयायां 'विश्वरूपविकटोक्ति' इत्यादिनैतन्नामोत्कीर्तनोपलम्भात् । विज्ञानेश्वरयोगी च ग्रन्थान्ते विक्रमनृपमभिवर्णयतीति विक्रमनृपकालिक इत्यवसीयते । अतोऽयं विश्वरूपाचार्यः विक्रमनृपादपि प्रचीनस्स्यादिति संभाव्यते ॥

No. 95 (3344).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता.

Yājñavalkya Smṛtiḥ with Vijñānēśvarīya.

Author—Sage Yājñavalkya.
Substance—Palm-leaf.
Size—$19\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—1–338.
Lines on a page—9.
Letters in a line—64.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

ओं – धर्माधर्मौ तद्विपाकास्त्रयोऽपि
क्लेशाः पञ्च प्राणिनामायतन्ते ।
यस्मिन्नेतैर्नो परामृष्ट ईशो
यस्तं वन्दे विष्णुमोङ्कारवाच्यम् ॥
याज्ञवल्क्यमुनिभाषितं मुहु-
र्विश्वरूपविकटोक्तिविस्तृतम् ।
धर्मशास्त्रमृजुभिर्मिताक्षरै-
र्बालबुद्धिविधये विविच्यते ॥

याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यप्रणीतं धर्मशास्त्रं संक्षिप्य कथयामास, यथा मनुनोक्तं भृगुः । तस्य चायमाद्यः श्लोकः—

योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः ॥

योगिनां सनन्दसनकादीनां य ईश्वरः श्रेष्ठतमः तं याज्ञवल्क्यं संपूज्य मनोवाक्कायकर्मभिः पूजयित्वा ॥

End:—

वरदानमाह—

श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्वा स्वयंभुवे ॥

एवदृषिभाषितं श्रुत्वा योगीश्वरोऽपि स्वनिर्मितधर्मशास्त्रधारणादि, प्रार्थनोन्मीलितमुखपङ्कजः स्वयंभुवे ब्रह्मणे नमस्कृत्वा प्रणम्य भवत्प्रार्थितं सकलमित्थं भवत्वित्येवं किल भगवान् बभाषे ॥

Colophon :—

इति श्रीभारद्वाजपद्मनाभभट्टोपाध्यायात्मज-श्रीमत्परमहंस-
परिव्राजक-विज्ञानेश्वरभट्टारककृतावृजुमिताक्षरा-
ख्यायां याज्ञवल्क्यधर्मशास्त्रविवृतौ
तृतीयोऽध्यायः ॥

Subject:—

It is a commentary explaining the verses of Yājnavalkya in a lucid manner.

प्रतिपाद्यविषयः—

प्रामाणिकशिरोमणिना विज्ञानेश्वरयोगिना प्रणीता याज्ञवल्क्यस्मृतिविवृतिरूपा मिताक्षराख्या व्याख्येयम्। अत्र च याज्ञवल्क्योक्तानामुपबृंहणं अनुक्तानां संपूरणं च तत्तत्स्मृतिवचनोपन्यासेन साधु वितन्येते । एतत्प्रतिपाद्यविषयास्तु एतन्मूलभूते No. 91 तमे याज्ञवल्क्यस्मृतिकोशे द्रष्टव्याः ॥

Noteworthy Features.—The Mitākṣarā described as Ṛjumitākṣarā in the colophon is considered as an important authority on Hindu Law. It professes to be a commentary on Yājñavalkya. But it is really in the nature of a digest of Smṛti material.

The author Vijñāneśvara, known also as Vijñanayogin, belonged, as stated in the colophon, to the Bharadvāja gōtra and was the son of Padmanābha Bhatta and a pupil of Uttama. He was an ascetic, a paramahamsa parivrajaka, and wrote his Mitākṣarā, as has been stated in the verses at the end of the chapter on Prāyaścitta, at the time of Cālukya Vikramāditya VI of Kalyan.

In this manuscript copy there is some change in the order of chapters ; the last chapter on Prāyaścitta comes in the middle and the second on Vyavahāra appears as the last.

वक्तव्यविशेषः—

अयं व्याख्याता विज्ञानेश्वरयोगी भरद्वाजगोत्रः पद्मनाभभट्टोपाध्याया त्मज इति प्रकरणान्तपरिदृश्यमानप्रशस्तिपङ्क्त्या ज्ञायते । तथा 'उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः' इति ग्रन्थान्ते मुद्रितकोशे दृश्यमानपद्यपर्यालोचनया उत्तमात्मनाम्नः शिष्य इत्यप्यवसीयते ॥

अपि चायं विज्ञानेश्वरः क्वचित् (मुद्रिते) प्रायश्चित्ताध्यायान्ते परिदृश्यमानेन—

'नासीदस्ति भविष्यति क्षितितले कल्याणकल्पं पुरं'

'स्रष्टा वाचां मधुरवपुषां विद्वदाश्चर्यसीम्नाम्'

इति श्लोकद्वयेन विक्रमादित्यनृपकालिक इति ज्ञायते । एतत्प्रणीता चेयं मिताक्षराख्या व्याख्या बह्वर्थगुम्भिता दुरूहानप्यर्थान् सुललितयैव शैल्या प्रतिपादयतीति नात्र बहुवक्तव्यमस्तीति ॥

कोशेऽस्मिन् अन्तिमः प्रायश्चित्ताध्यायो मध्ये, द्वितीयो व्यवहाराध्यायश्चान्ते लिखितो दृश्यते । सव्याख्येयं स्मृतिर्मुद्रिता च दृश्यते ॥

No. 96 (4194/1).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता.

Yājñavalkya Smṛtiḥ Vijñānēsvarīyayutā.

Author—Sage Yājñavalkya.
Substance—Palm-leaf.
Size—$13\frac{1}{4} \times 2\frac{3}{8}$ inches.
Character—Nāgari.
Folios—1–192.
Lines on a page—10.
Letters in a line—68.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 95.

End:—

परपाकनिवृत्तादेर्लक्षणं च तेनैवोक्तम्—
गृहीत्वाऽग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः ॥
पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥
गृहस्थधर्मवृत्तो यो ददाति परिवर्जितः ।
ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः ॥

Subject:—

As in No. 95.

Noteworthy Features.—This is an incomplete copy of the work breaking at the end of the prakaraṇa on Abhakṣya bhakṣaṇa in the chapter on Prāyaścitta.

वक्तव्यविशेषः—

कोशेऽस्मिन् स्मृतिरियं सव्याख्या आचाराध्यायप्रभृति समग्रप्रायाभक्ष्यभक्षणप्रायश्चित्तप्रकरणान्ता परिदृश्यते ॥

No. 97 (C. 1542).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (आचारव्यवहाराध्यायौ).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Ācāra and Vyavahāra).

Author—Sage Yājñavalkya.
Substance—Paper.
Size—15¾ × 5 inches.
Character—Telugu.
Folios—1-265.
Lines on a page—10.
Letters in a line—43.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 95.

End :—

यस्माच्च दण्डरूपेण यावद्गृहीतमन्यायेन नात्रतस्मै प्रतिदेयम्। इतरथा अपहारदोषप्रसङ्गात्। अन्यायदण्डग्रहणे पूर्वस्वामिनः स्वत्व-विच्छेदाभावात्॥

Colophon :—

इति श्री पद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजक-श्रीविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्य-धर्मशास्त्रविवृतौ द्वितीयोऽध्यायः समाप्तः॥

Subject:—

As. in No. 95.

Noteworthy Features.—This copy contains only the first two chapters of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन् प्रथमद्वितीयावाचारव्यवहाराध्यायौ सव्याख्यावुप-लभ्येते॥

No. 98 (3654).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (आचारान्त्यभागव्यवहाराध्यायौ).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Ācāra and Vyavahāra).

Author—Sage Yājñavalkya.
Substance—Palm-leaf.
Size—$15\frac{1}{8} \times 2\frac{1}{2}$ inches.
Character—Grantha.
Folios—1–114.
Lines on a page—15.
Letters in a line—48.
Age of MS—old.

Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

साधारणान् गृहस्थधर्मानुक्त्वा राज्ञोऽभिषेकयुक्तस्य गृहस्थस्य धर्मानाह—

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः ।
विनीतस्सत्वसम्पन्नः कुलीनस्सत्यवाक्शुचिः ॥
अदीर्घसूत्री स्मृतिमानक्षुद्रोऽपरुषस्तथा ।
धार्मिकोऽव्यसनश्चैव प्राज्ञश्शूरो रहस्यवित् ॥
स्वरन्ध्रगोप्ताऽऽन्वीक्षक्यां दण्डनीत्यां तथैव च ।
विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः ॥

पुरुषार्थसाधनकर्मारम्भाध्यवसाय उत्साहः । महानुत्साहो यस्य तथा । बहुदेयार्थदर्शी स्थूललक्षः ॥

End:—

अन्यायेन यो दण्डो राज्ञा लोभादिना गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायेदमिति सङ्कल्प्य ब्राह्मणेभ्यस्स्वयं दद्यात् । यस्माच्च दण्डरूपेण यावद्गृहीतमन्यायेन तावत्तस्मै प्रतिदेयमिति । अन्यथा व्यवहारदोषप्रसङ्गात्, अन्यायदण्डग्रहणे पूर्वस्वामिनस्स्वत्वविच्छेदाभावात् ॥

Colophon :—

इति परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतावृजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयोऽध्यायस्समाप्तः ॥

Subject :—

As in No. 95.

Noteworthy Features.—This is an incomplete copy. It begins with the last prakaraṇa on Rājadharma of the Ācāra section and contains in full the Vyavahāra Chapter of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन् इयं स्मृतिस्सव्याख्या आचाराध्यायान्त्यप्रकरणभूतराजधर्मप्रकरणप्रभृति व्यवहाराध्यायसमाप्त्यन्ता परिदृश्यते ॥

No. 99 (3455).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (आचारप्रायश्चित्ताध्यायौ).

Yājñavalkya Smṛtiḥ Vijñāneśvarīya Mitākṣarāvyākhyāyutā (Ācāra and Prāyaścitta).

Author—Sage Yājñavalkya
Substance—Palm-leaf.
Size—$18\frac{5}{8} \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—1-206.
Lines on a page—9.
Letters in a line—64.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Not quite correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning :—

As in No. 95.

End :—

यत्तु चतुर्विंशतिमतेऽभिहितम्—

विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ।
अन्या वा पावनी काचित्समान्याहुर्मनीषिणः ॥

इति प्राजापत्यस्थाने द्वादशानां भोजनमुक्तम्, तन्निर्धनविषयम् । यच्च चान्द्रायणस्यापि प्रत्याम्नानं तत्रैव, तथोक्तं—चा . . . . ॥

Subject :—

As in No. 95.

Noteworthy Features.—This is an incomplete copy containing the commentary in full on the Ācārakāṇḍa and up to sloka 326 in the Prāyaścittakāṇḍa of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन् आचाराध्यायस्य समग्रस्य, प्रायश्चित्ताध्याये ३२६ श्लोकानां च व्याख्योपलभ्यते ॥

No. 100 (2680/1).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (आचारप्रायश्चित्ताध्यायौ).

Yājñavalkya Smṛtiḥ with Vijñānēśvarīya Mitākṣarā-vyākhyāyutā (Ācāra and Prāyaścitta).

Author—Sage Yājñavalkya.
Substance—Palm-leaf.
Size—$19\frac{1}{2} \times 2\frac{1}{8}$ inches.
Character—Telugu.
Folios—1-119.
Lines on a page—12.
Letters in a line—108.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning :—

As in No. 95.

End :—

ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शिताः। तेषां समवाये क्रमोऽपि दर्शितः। इदानीं कर्त्रन्तरे तत्समवाये च क्रममाह—

रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥

अन्यदीयद्रव्यं अन्यस्य क्रयादिव्यतिरेकेण यत्स्वं भवति तद्रिक्थम्। विभागद्वारेण रिक्थं गृह्णातीति॥

Subject:—

As in No. 95.

Noteworthy Features.—This is an incomplete copy of the work containing the commentary in full on Ācāra and Prāyaścitta and in part on Vyavahāra.

वक्तव्यविशेषः—

अस्मिन् कोशे आचारप्रायश्चित्ताध्यायौ समग्रौ, व्यवहाराध्यायस्त्वसमग्रः परिदृश्यते॥

No. 101 (A 102).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (आचाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīya Mitākṣarā-vyākhyāyutā (Acāra).

Author—Sage Yājñavalkya.	Age of MS—Old.
Substance—Paper.	Condition of MS—Good.
Size—13 × 8⅜ inches.	Correct or incorrect—Correct.
Character—Telugu.	Complete or incomplete—Incomplete.
Folios—1-36.	Acquired or transcribed—Acquired.
Lines on a page—17.	
Letters in a line—38.	

Beginning :—

As in No. 95.

End :—

एतान् क्रव्यादादीन् वर्जयेत्—

कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान्।
वृथाकृसरसंयावपायसापूपशष्कुलीः ॥

कोयष्टिकः क्रौञ्चः। प्लवः—जलकुक्कुटः। चक्राह्वः—चक्रवाकः। बलाकाबकौ प्रसिद्धौ। नखैर्विकीर्य भक्षयन्तीति विष्किराश्चकोरादय एव गृह्यन्ते ॥

Subject :—

As in No. 95.

Noteworthy Features.—This is also an incomplete copy and contains the commentary on Ācāra only, that too, not in full.

वक्तव्यविशेषः—

कोशेऽस्मिन् आचाराध्यायमात्रं दृश्यते। तदप्यसमग्रम् ॥

No. 102 (1576).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता
(व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīya Mitākṣarā-vyākyāyutā (Vyavahāra).

Author—Sage Yājñavalkya.
Substance—Palm leaf.
Size—$18\frac{3}{4} \times 2\frac{1}{8}$ inches.
Character—Grantha.
Folios—1–84.
Lines on a page—13.
Letters in a line—75.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

अभिषेकादिगुणयुक्तस्य क्षत्रियस्य प्रजापरिपालनं परमो धर्मः। तच्च दुष्टनिग्रहमन्तरेण न संभवति। दुष्टपरिज्ञानं च व्यवहारदर्शनेन भवतीति व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तं 'व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम्' इति। स च व्यवहारः कीदृशः कीताविधः, कथं चेतीतिकर्तव्यताकलापो नाभिहितः, तदभिधानाय द्वितीयोऽध्याय आरभ्यते—

व्यवहारान्नृपः पश्येत् विद्वद्भिर्ब्राह्मणैस्सह।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥

End:—

यस्माद्दण्डरूपेण यावद्गृहीतमन्यायेन तावत्तस्मै प्रतिदेयं, इतरथाऽपहारदोषप्रसङ्गात्। अन्यायदण्डग्रहणे पूर्वस्वामिनः स्वत्वविच्छेदाभावाच्चेति॥

इति पद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षराख्यायां याज्ञवल्कीयधर्मशास्त्रविवृतौ द्वितीयोऽध्यायो व्यवहाराख्यस्समाप्तः॥

अस्मिन्नध्याये प्रकरणानुक्रमणिका कथ्यते—

आद्यं साधारणव्यवहारमातृकाप्रकरणम्, असाधारणव्यवहार-मातृका, ऋणादानं, उपनिधिः, साक्षिप्रकरणं, लेख्यप्रकरणं, दिव्यप्रकरणं, दायविभागः, सीमाविवादः, स्वामिपालविवादः, अस्वामिविक्रयः, दत्ता-प्रदानिकं, क्रीतानुशयः, अभ्युपेत्याशुश्रूषा, संविद्व्यतिक्रमः, वेतनादानम्, द्यूतसमाह्वयः, वाक्पारुष्यम्, दण्डपारुष्यम्, साहसं, विक्रीया-संप्रदानम्, संभूयसमुत्थानं, स्तेयं, स्त्रीसंग्रहणं, प्रकीर्णकम्, इति पञ्चविंशतिप्रकरणानि ॥

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥

Colophon:—

इति याज्ञवल्क्यमुनिशास्त्रगतव्यवहारकाण्डविवृतिरभिहिता ।
ऋजुमिताक्षरपदग्रहणानां मधुरा गंभीरविवृतार्थवती ।
गंभीराभिः प्रसन्नाभिर्वाग्भिर्नाम्ना मिताक्षरा ॥

Subject:—

As in No. 95.

Noteworthy Features.—This is an incomplete copy containing in full the commentary on the second chapter of the work on Vyavahāra.

वक्तव्यविशेषः—

As in No. 95.

No. 103 (1577).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता
(व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīya Mitākṣarā-vyākhyāyutā (Vyavahāra).

Author—Sage Yājñavalkya.	Size—$18\frac{1}{8} \times 1\frac{7}{8}$ inches.
Substance—Palm-leaf.	Character—Grantha.

Folios—1-102.
Lines on a page—10.
Letters in a line—60.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning, End, etc.—As in No. 95.

Noteworthy Features.—This copy also contains the commentary on the chapter on Vyavahāra.

No. 104 (C106).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Vyavahāra).

Author—Sage Yājñavalkya.
Substance—Paper.
Size—14×5¾ inches.
Character—Dēvanāgari.
Folios—1-116.
Lines on a page—13.
Letters in a line—46.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Not quite correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning :—

No. 102. कोशवत्.

End :—

रागलोभादिनाऽन्यथा व्यवहारदर्शने दण्डमाह—

दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् नृपेण तु ।
सभ्यास्सजयिनो दण्ड्या विवादाद्द्विगुणं दमम् ॥

दुर्दृष्टान् स्मृत्याचारप्राप्तधर्मोल्लङ्घनेन रागलोभादिभिरसम्यग्विचारितत्वेनाशङ्क्यमानान् व्यवहारान् पुनः स्वयं सम्यग्विचार्य निश्चितदोषाः

As in No. 95.

Noteworthy Features.—This copy also contains only the second Chapter on Vyavahāra; but the commentary on the last three verses is missing.

वक्तव्यविशेषः—

कोशेऽस्मिन् व्यवहाराध्यायमात्रं दृश्यते । तत्रत्यान्तिमश्लोकत्रयव्याख्या परं न दृश्यते ॥

No. 105 (C107).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Vyavahāra).

Author—Yājñavalkya.
Substance—Paper.
Size—$12\frac{1}{8} \times 6\frac{1}{8}$ inches.
Character—Dēvanāgari.
Folios—1-66.
Lines on a page—13.
Letters in a line—38.
Age of MS—Old.
Condition of MS—Not good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

No. 102 कोशवत्.

End:—

अत्रोच्यते—लौकिकमेव स्वत्वं, लौकिकार्थक्रियासाधनत्वात्, व्रीह्यादिवत् । आहवनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाधनत्वमस्ति । नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येव, नैतत् । न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वं, किं तर्हि ? प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण । इह तु सुवर्णादिरूपेण न क्रयादि . . . . ॥

Subject:—

As in No. 95.

प्रतिपाद्यविषयः—

No. 95 तमकोशे द्रष्टव्यः.

Noteworthy Features.—This is also an incomplete copy of the work containing the Chapter on Vyavahāra from the beginning to the commencement of the section (Prakaraṇa) on Dāyabhāga (division of property).

वक्तव्यविशेषः—

द्वितीये व्यवहाराध्याये आदितो दायभागप्रकरणारम्भपर्यन्तमत्र दृश्यते ॥

No. 106 (C 311).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ. Vijñanēśvarīyayutā (Vyavahāra).

Author—Sage Yājñavalkya
Substance—Paper.
Size—$10\frac{1}{2} \times 4\frac{3}{4}$ inches.
Character—Dēvanāgari
Folios—1-201.
Lines on a page—11.
Letters in a line—36.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Not so very correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning:—

As in No. 102.

End:—

अन्यायेन यो दण्डो राज्ञा लोभादिना गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायेदमिति संकल्प्य ब्राह्मणेभ्यस्स्वयं दद्यात्। यस्माच्च यावद्दण्ड-

रूपेण गृहीतमन्यायेन तावत्तस्मै प्रतिदेयम्, इतरथा प्रतिदोषप्रसङ्गात्। अन्यायेन दण्डग्रहणं पूर्वस्वामिनः स्वत्वविच्छेदाभावात् ॥

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः॥
इति याज्ञवल्क्यमुनिशास्त्रगतव्यवहारिकासु विवृतिर्विहिता।
ऋजुसंमिताक्षरपदग्रथना मधुरा गभीरविततार्थवती॥
गम्भीराभिः प्रसन्नाभिर्वाग्भिर्नाम्ना मिताक्षरा।
अनल्पार्थाभिरल्पाभिर्विवृतिर्विहिता मया॥
इति याज्ञवल्क्यमुनिशास्त्रगता विवृतिर्न कस्य विहिता विदुषः।
प्रमिताक्षराऽपि विपुलार्थवती परिषिञ्चति श्रवणयोरमृतम्॥

Colophon:—

इति श्रीपद्मनाभभट्टोपाध्यायात्मजस्य श्रीमत्परमहंसपरिव्राजक-श्रीविज्ञानेश्वरपरमभट्टारकस्य कृतावृजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्र-विवृतौ द्वितीयोऽध्यायस्समाप्तः॥

Subject:—

As in No. 95.

Noteworthy Features.—This copy contains only the Chapter on Vyavahāra.

No. 107 (1138).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता
(व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñanêśvarīyayutā
(Vyavahāra).

Author—Sage Yājñavalkya
Substance—Palm-leaf.
Size—$17\frac{1}{8} \times 1\frac{1}{8}$ inches.
Character—Telugu.

Folios—1–140.
Lines on a page—7.
Letters in a line—78.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning:—

No. 102 कोशवत्।

End:—

यदा दास्योऽवरुद्धा भुजिष्या भवेयुः तदा तासु, तथा चशब्दाद्वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां ग्रहणम्, तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत्पणान् दण्डनीयः। परपरिगृहीतत्वेन तासां परदारतुल्यत्वात्। एतच्च स्पष्टमुक्तं नारदेन—

स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या।

Subject:—

As in No. 95.

Noteworthy Features.—This is an incomplete copy containing only the Vyavahāra Chapter from the beginning up to the section on Strī Sangrahaṇa.

वक्तव्यविशेषः—

अस्मिन् कोशे व्यवहाराध्याये आदितः असमग्रस्त्रीसङ्ग्रहप्रकरण-(२९० श्लो.) पर्यन्तमुपलभ्यते॥

No. 108 (1266).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ. Vijñanêśvarīyayutā (Vyavahāra).

Author—Sage Yājñavalkya.
Substance– Palm-leaf.
Size—16¼ × 1½ inches.
Character—Telugu

Folios—1-124.
Lines on a page—7.
Letters in a line—68.
Age of MS—Old.
Condition of MS—Not good (worm-eaten).
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

No. 102 कोशवत्।

End:—

अन्यायगृहीतदण्डधनस्य गतिमाह—
राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम्।
निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम्॥
अन्यायेन यो दण्डो राज्ञा लोभादिना गृहीतः तत्त्रिंशद्गुणीकृतं वरुणायेदमिति सङ्कल्प्य ब्राह्मणेभ्यः स्वयं दद्यात्॥

Colophon:—

याज्ञवल्क्यधर्मशास्त्रनिवृतौ द्वितीयोऽध्यायस्समाप्तः॥

Subject:—

As in No. 95.

Noteworthy Features.—Contains only the Chapter on Vyavahāra.

No. 109 (C 432).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñaneśvarīya (Vyavahāra).

Author—Sage Yājñavalkya
Substance—Paper.
Size—$7\frac{7}{8} \times 4\frac{1}{8}$ inches.
Character—Telugu.
Folios—1-126.
Lines on a page—10.

Letters in a line—24.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning:—

No. 102. कोशवत्.

End:—

ततः—'यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे' इति अभिशस्तोऽभिमन्त्रयेत् ।

अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितम् ।
धर्मे गृहीते शुद्धस्स्यादधर्मे तु स हीयते ।
एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम् ॥
इति धर्माधर्मदिव्यविधिः ॥

विभागं चेत्पिता कुर्यादित्यादिना प्रबन्धेन समानजातीयानां भ्रातॄणां परस्परं पित्रा च सह विभागक्लृप्तिरुक्ता । अधुना भिन्नजातीयानां विभागमाह—

चतुस्त्रिद्व्येकभागास्स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥

Subject:—

As in No. 95.

Noteworthy Features.—This is also an incomplete copy and contains commentary for 125 verses in the Vyavahāra Chapter.

वक्तव्यविशेषः—

कोशेऽस्मिन् सव्याख्येयं स्मृतिः व्यवहाराध्याये आदित आरभ्य भिन्नजातीयविभागनिरूपणारम्भ (१२५ श्लो.) पर्यन्ता दृश्यते ॥

No. 110 (2199).

याज्ञवल्क्यस्मृतिः. विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Vyavahāra).

Author—Sage Yājñavalkya
Substance—Palm-leaf.
Size—$16\frac{7}{8} \times 1\frac{3}{8}$ inches.
Character—Telugu.
Folios—1-90.
Lines on a page—7.
Letters in a line—68.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

No. 102. कोशवत्.

End:—

पुत्रिकासुत इति पुत्रिकायास्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानात्। चशब्दाद्दुहित्रभावे दौहित्रो धनभाक्। यथाऽऽह विष्णुः—

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः॥

इति। मनुरपि—

अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्।
पौत्त्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥

इति। तदभावे पितरौ मा . . . . . ॥

Subject:—

As in No. 102.

Noteworthy Features.—Contains the commentary on 135 Slokas only of the chapter on Vyavahāra, *i.e.*, from the

beginning to the commencement of the topic of the division of property of persons without a male issue.

वक्तव्यविशेषः—

कोशेऽस्मिन् सव्याख्येयं स्मृतिः व्यवहाराध्याये आदितः प्रभृति अपुत्रधनविभागनिरूपणारम्भ (१३५ श्लो.) पर्यन्ता दृश्यते ॥

No. 111 (A 55).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहाराध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Vyavahāra).

Author—Vijñānēśvara Yogi
Substance—Paper.
Size—13 × 7½ inches.
Character—Telugu.
Folios—1-59.
Lines on a page—28.
Letters in a line—28.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 102.

End:—

अपि च—

उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् ।
प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात् ॥

धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना, न वृद्धिलोभेन स्थापयितव्यः, अन्यथा अमोक्षणे स्तेनः चोरवद्दण्ड्यो भवेत् । असंनिहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात् । अथ प्रयोक्ताऽप्यसंनिहितः ॥

Subject:—

As in No. 95.

Noteworthy Features.—Contains the commentary on 62 Slokas of the chapter on Vyavahāra.

वक्तव्यविशेषः—

कोशेस्मिन् सव्याख्येयं स्मृतिः व्यवहाराध्याये आदितः ६२ श्लोकपर्यन्ता दृश्यते ॥

No. 112 (C 182).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (व्यवहारकाण्डमात्रम्).

Yājñavalkya Smṛtiḥ with Vijñānēśvarīya (Vyavahāra).

Author—Sage Yājñavalkya	Condition of MS—Good.
Substance—Paper.	Correct or incorrect—Correct.
Size—$9\frac{3}{4} \times 4\frac{7}{8}$ inches.	Complete or incomplete—Incomplete.
Character—Dēvanāgari.	Acquired or transcribed—Acquired.
Folios—1–15.	
Lines on a page—11.	
Letters in a line—40.	
Age of MS—Old.	

Beginning:—

प्रमाणं मानुषं दैवमिति भेदेन वर्णितम् ।
अधुना वर्ण्यते दायविभागो योगमूर्तिना ॥

तत्र दायशब्देन यद्धनं स्वामिसंबन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते । स च द्विविधः, अप्रतिबन्धस्सप्रतिबन्धश्च । तत्र पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं-भवतीत्यप्रतिबन्धो दायः ॥

End:—

अधुना भिन्नजातीयानां विभागमाह—

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः ।

क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥

तिस्रो वर्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः, क्षत्रियस्य तिस्रः, वैश्यस्य द्वे, शूद्रस्यैकेति भार्या दर्शिताः ॥

Subject:—

As in No. 95.

Noteworthy Features.—It is also an incomplete copy containing the commentary on Dāyabhāga in the Vyavahārādhyāya of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन् व्यवहाराध्याये दायविभागप्रकरणमात्रं दृश्यते। तच्चासमग्रं भिन्नजातीयविभागप्रकरणपर्यन्तं (१२५ श्लो·) दृश्यते ॥

No. 113 (2997).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (प्रायश्चित्ताध्यायमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā (Prāyaścitta).

Author—Sage Yājñavalkya
Substance—Palm-leaf.
Size—$13\frac{3}{4} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—1–199.
Lines on a page—7.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not so very correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

श्रीहयग्रीवाय नमः ॥

'वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः' इत्यत्र प्रतिपाद्यतया प्रतिज्ञातषड्विधधर्ममध्ये पञ्चप्रकारं धर्ममभिधायाधुना विशिष्ट-नैमित्तिकधर्मजातं प्रायश्चित्तपदाभिलप्यं प्रारिप्सुः प्रथमं तत्प्ररोचनार्थ-मधिकारिविशेषप्रतिपादनार्थं चार्थवादरूपं कर्मविपाकं तावदाह—

महापातकजान् घोरान्नरकान् प्राप्य दारुणान् ।
कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥

ब्रह्महत्यादिपञ्चकस्य महापातकसंज्ञा 'ब्रह्महा मद्यपः स्तेनः' इत्यत्र वक्ष्यते । तद्योगिनो महापातकिनः ॥

End:—

वरदानमाह—

श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ।
एवमस्त्विति होवाच नमस्कृत्य स्वयंभुवे ॥

एतदृषिभिर्भाषितं श्रुत्वा योगीन्द्रः स्वनिर्मितधर्मशास्त्रधारणादि-फलप्रार्थनोन्मीलितमुखपङ्कजः स्वयंभुवे ब्रह्मणे नमस्कृत्वा प्रणम्य भवत्प्रार्थितं श्रुतं सकलमित्थं भवत्वित्येवं किल भगवान् बभाषे ॥

Colophon :—

इति श्रीपद्मनाभभट्टोपाध्यायात्मज-श्रीमत्परमहंसपरिव्राजक - विज्ञानेश्वरभट्टारकस्य कृतावृजुमिताक्षर्याह्विकायां याज्ञवल्क्यधर्मशास्त्र-विवृतौ तृतीयोऽध्यायस्समाप्तः ॥

Subject:—

As in No. 95.

प्रतिपाद्यविषय:—

याज्ञवल्क्यस्मृतिव्याख्यायां विज्ञानेश्वरीयमिताक्षरायामयमन्तिमः प्रायश्चित्ताध्यायभागः। अत्र च याज्ञवल्क्योक्तानां विवेचनं, उपबृंहणं अनुक्तांशपूरणं च क्रियते। एतदध्यायप्रतिपाद्यविषयस्तु एतन्मूलभूते No. 95 तमे याज्ञवल्क्यस्मृतिकोशे द्रष्टव्यः ॥

Noteworthy Features.—Contains only commentary on the third chapter of the Smṛti.

वक्तव्यविशेषः—

कोशेऽस्मिन् तृतीयाध्यायगतप्रायश्चित्तप्रकरणमात्रं दृश्यते ॥

No. 114 (1681).

याज्ञवल्क्यस्मृतिः विज्ञानेश्वरीयमिताक्षराख्यव्याख्यायुता (प्रायश्चित्तकाण्डमात्रम्).

Yājñavalkya Smṛtiḥ Vijñānēśvarīyayutā
(Prāyaścitta Kāṇda)

Author—Sage Yājñavalkya.	Age of MS—Old.
Substance—Palm-leaf.	Condition of MS—Good.
Size—$15\frac{1}{2} \times 1\frac{1}{8}$ inches.	Correct or incorrect–Correct.
Character—Grantha.	Complete or incomplete—Complete.
Folios—3–189.	Acquired or transcribed—Acquired.
Lines on a page—7.	
Letters in a line—60.	

Beginning.—

'पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितौ ' इति देवलस्मरणात् । . . . . . नामन्यत्रापीच्छया द्वयम्, इति । अयमर्थः—चौलकर्मानन्तरकाले नियमेनाग्युदकदानं कार्यम् । अन्यत्राऽपि नामकरणा . . . ॥

End:—

य इमं श्रावयेद्विद्वान् द्विजान् पर्वसु पर्वसु ।
अश्वमेधफलं तस्य तद्भवाननुमन्यताम् ॥

यस्त्विदं धर्मशास्त्रं प्रतिपर्व द्विजान् श्रावयेत् तस्याश्वमेधफलं भवेदिति श्रावणविध्यर्थवादः । तदेतदस्मत्प्रार्थितमर्थं सर्वत्र भवाननुमन्यताम् ॥

श्रुत्वैतद्याज्ञवल्क्योऽपि प्रीतात्मा मुनिभाषितम् ॥
एवमस्त्विति होवाच नमस्कृत्य स्वयंभुवे ॥

योगीन्द्रोऽपि स्वनिर्मितधर्मशास्त्रधारणादिफलप्रार्थनोन्मीलितमुखपङ्कजः स्वयंभुवे ब्रह्मणे नमस्कृत्य प्रणम्य भवत्प्रार्थितं सकलमित्थं भवत्वित्येवं किल भगवान् बभाषे ॥

Colophon:—

इति विज्ञानेश्वरभट्टारस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ तृतीयोऽध्यायः ॥

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥
इति याज्ञवल्क्यमुनिशास्त्रगता विवृतिर्न कस्य विहिता विदुषः ।
प्रमिताक्षराऽपि विपुलार्थवती परिषिञ्चति श्रवणयोरमृतम् ॥
गम्भीराभिः प्रसन्नाभिर्वाग्भिर्नाम्ना मिताक्षरा ॥
अनल्पार्थाभिरल्पाभिर्विवृतिर्विहिता मया ॥

Subject:—

As in No. 113.

Noteworthy Features.—Contains only the chapter on Prāyaścitta. The first two leaves of the MS are missing.

No. 115 (A 15).

याज्ञवल्क्यस्मृतिव्याख्यामिताक्षराव्याख्या सुबोधिनी.

Yājñavalkya Smṛti Vyākhyā Mitākṣarā Vyākhyā Subōdhinī.

Author—Bhatta Viśvēśvara
Substance—Paper.
Size—$12\frac{7}{8} \times 7\frac{7}{8}$ inches.
Character—Telugu.
Folios—2–90.
Lines on a page—16.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

. . . . तत्त्वात्त एव सभासद इति वक्तुं न शक्यते । अतस्तद्वचनविरोधाद्विशेषणविशेष्यभावाभावाच्च तदुद्देशेन विधिर्न घटत इत्यर्थः । स

प्राड्विवाक इति । राजप्रतिनिधिः प्राड्विवाकः । अमात्या बुद्धिसचिवाः । ब्राह्मणानामनियुक्ततया भेदमाह—तत्र ब्राह्मणा अनियुक्ता इत्यादिना । अत्र नियोगे नृपोऽधिकारी तेन नियुक्ताश्चेत्यर्थः । तेऽपि तद्भागिन इति । तत्पापभागिन इत्यर्थः । मूलवचनस्थचशब्दद्योत्यमर्थमाह—रिपौ मित्रौ चेति चशब्दादिति । ननु नृपस्य प्रतिदिनं व्यवहारदर्शनं कर्तव्यत्वेन विहितं, तथा शान्तिकादीनि कर्तव्यान्तराण्यपि विहितानि । तत्र दैववशादुभयसमवाये किं कर्तव्यमित्याशङ्क्य दान्तत्वादिगुणयुक्तं सभासदादिभ्यः पृथग्भूतं ब्राह्मणं तदभावे तादृशं क्षत्रियं तस्याप्यभावे वैश्यं वा व्यवहारदर्शने नियोजयेदित्याह—व्यवहारान् नृपः पश्येदित्युक्तमित्यादिना । योगीश्वरोक्तमनुकल्पमेव मुख्यं मन्यते नारद इत्याह—नारदेन त्वयमेवेति ॥

End :—

नारदवचनस्थतीरितशब्दार्थमाह—तीरितमित्यादिना अनुद्धृतदण्डमित्यन्तेन । अनुशिष्टशब्दार्थमाह—अनुशिष्टमित्यादिना यावदित्यन्तेन । ननु तीरितं चेति नारदवचने निर्णीतस्य व्यवहारस्य दण्डावष्टम्भं पुरस्सरकरणं प्रतीयते, मनुवचने त्वेतद्वैपरीत्यं, अतः परस्परविरोध इत्याशङ्क्य परिहरति—यत्पुनर्मनुवचनमित्यादिना । अयमभिप्रायः—धर्मतो व्यवहारो निर्णीत इति निश्चिते पुनः स एव व्यवहारो न निवर्तनीय इत्युच्यते, न पुनर्धर्मतो निर्णीतं न वेति सन्देहे न निवर्तनीय इत्युच्यत इति । एतदुक्तं भवति—नारदवचनं संशयविषयं, मनुवचनं निश्चितविषयमिति ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिकानामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपेद्दिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
विज्ञानेश्वरसूक्तिभावविवृतौ दक्षश्चिरं वर्धते ॥
अत्रानुक्तं दुरुक्तं किमपि यदि भवेत् तद्धि सूक्तं कृषीरन्
सङ्ख्यावन्तो महान्तो यदुपकृतिविधौ शीलमेषामतन्त्रम् ।

No. 116 (C 241).

याज्ञवल्क्यस्मृतिव्याख्यामिताक्षराव्याख्या सुबोधिनी.

Yājñavalkya Smṛti Vyākhyā Mitākṣarā Vyākhyā Subōdhinī.

Author—Bhatta Viśvēśvara.
Substance—Paper.
Size—9 × $3\frac{3}{8}$ inches.
Character—Dēvanāgari.
Folios—1-52.
Lines on a page—9.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Almost correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

महता प्रणिधानेन दायभागप्रकरणं व्याचिख्यासुर्निबन्धकारः पूर्वोत्तरयोर्ग्रन्थसंदर्भयोः पद्यबन्धेन संगतिं दर्शयति—प्रमाणं मानुषं दैवमिति। दायशब्दार्थमाह–तत्र दायशब्देनेति। अयमर्थः—धनस्वामिना पित्रादिना सह यस्सबन्धो जन्यजनकत्वादिस्तस्मात्संबन्धरूपान्निमित्तादन्यस्य संबन्धप्रतियोगिनः पुत्रादेः स्वं यद्धनं भवति तद्धनं दायशब्देनोच्यत इति॥

End :—

'विवाहान्तरमेव पूर्वस्या धर्मपत्न्या धनदाने निमित्तमित्याह—अधिवेदननिमित्तं धनमिति। तत्कियदित्याकाङ्क्षायामाह–समं यावदधिवेदनार्धमिति। अत्र मूलवचनस्थमर्धपदं न नपुंसकलिङ्गं, येन समविभागवाचकं, अपि तु पुंलिङ्गम्। अत एवांशमात्रवदित्यभिप्रायेणाह—अर्धशब्दश्चात्रेति। 'पुंस्यर्धोऽर्धं समेऽशके' इत्यमरः।

Colophon:—

इति रिक्थविभागप्रकरणं समाप्तम्॥

Subject:—

Is the commentary on the Dāyabhāga of the Vyavahārādhyāya of Mitākṣara.

Noteworthy Feature.—This is an incomplete copy.

प्रतिपाद्यविषयः—

एतद्व्याख्यापरिदृश्यमानदायभागप्रकरणस्थविषयाश्च एतत्परम- मूलभूते No. 95 तमे याज्ञवल्क्यस्मृतिकोशे द्रष्टव्याः ॥

वक्तव्यविशेषः—

सुबोधिनी चेयं भट्टविश्वेश्वरप्रणीता याज्ञवल्क्यस्मृतिव्याख्याया विज्ञानेश्वरीयमिताक्षराया व्याख्या । अत्र कोशे व्यवहाराध्यायस्थं दाय- भागप्रकरणमेकमेव दृश्यते ॥

No. 117 (A 669/6).

लिखितस्मृतिः (लिखितसंहिता).

Likhita Smṛti.

Author—Likhita Rishi.
Substance—Paper.
Size—13×8$\frac{3}{8}$ inches.
Character—Telugu.
Folios—13–14.
Lines on a page—25.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

इष्टापूर्ते तु कर्तव्ये ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्ते मोक्षमवाप्नुयात् ॥
एकाहमपि कर्तव्यं भूमिस्थमुदकं शुभम् ।
कुलानि तारयेत्सप्त यत्र गौर्वितृषा भवेत् ॥
भूमिदाने च ये लोकाः गोदानेन च कीर्तिताः ।
तान् लोकान् प्राप्नुयात्सम्यक् पादपानां प्ररोहणे ॥

वापीकूपतटाकानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्णफलमश्नुते ॥
अग्निहोत्रं तपस्सत्यं वेदानां चैव पालनम् ॥
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥

End:—

ग्रामाचाराः कुलाचारा देशाचाराश्च शाश्वताः ।
सर्वेषु च युगेष्वेषु सर्वत्रैव यथो . ताः ॥
कर्तव्यास्स्युर्विशेषेण महतीं भूतिमिच्छता ।
कार्यानुस्तरणासम्य . . . माश्वलायनः ॥
चयन . स्तु सन्देहात्प्रत्यङ्गेषु च पिण्डतः ।
साङ्गं हि कथयामास पिण्डा वेति च वाक्यतः ॥
तेन . . . . ॥

Subject:—

Deals with such topics as the performance of sacrifices and Śrāddhas, offering of food to the manes, prohibition of marriage after puberty, etc.

प्रतिपाद्यविषयः—

इष्टापूर्तकर्मप्रशंसा, नीलवृषोत्सर्गतल्लक्षणादि, गयापिण्डदानं, षोडशश्राद्धानि, संक्रान्त्यादिषु पिण्डदानं, क्वचित् एकोद्दिष्टविधानं, संविभागविधिः, पुष्पिणीविवाहनिषेधः, कर्मसामान्यपरिभाषा, देशाचारानुष्ठानावश्यकता, इत्येतत्सर्वमत्र प्रतिपाद्यते ॥

Noteworthy Features.—This is an incomplete copy of the work and is identical in content and form up to the 40th stanza, with the version printed both in the Jīvānanda and the Ānandāśrama collections as Likhita Smṛti. It is different from the Likhita Smṛti printed in six chapters at Madras in Telugu characters with a commentary and also from the unpublished Likhita Smṛti which forms part of the Brahmāṇḍapurāṇa and is attributed to Likhita, son of Kaṇva.

वक्तव्यविशेषः—

कोशेऽस्मिन्निय स्मृतिरसमग्रा दृश्यते। आनन्दाश्रमकल्कत्तानगरयो-र्मुद्रितलिखितस्मृतिकोशस्थ ४० श्लोकपर्यन्तमियं तत्सदृशी ततः परं विलक्षणा च दृश्यते। तत्रैवानन्दाश्रमे एतदादिभागसदृश्यन्याऽपि लघुशंखस्मृतिनाम्ना मुद्रिता दृश्यते। अध्यायषट्कपरिच्छिन्ना एतत्समान-नामधेयाऽन्यापीयं स्मृतिः No. 118–19 कोशान्तरयोर्दृश्यते। साऽप्यान्ध्राक्षरे मुद्रिता। कुत्राप्यमुद्रिताऽन्याऽपि ब्रह्माण्डपुराणान्तर्गता लिखितस्मृतिरेतत्कोशालये No. 120 तमकोशे दृश्यते। एतत्कोशे दृश्यमानस्मृतिकर्तुर्लिखितस्य पितुर्नाम न निर्दिष्टम्। एतद्विसजातीय-लिखितस्मृतिकर्तुस्तु कण्वात्मजत्वं तत्र निर्दिष्टं दृश्यते। एतत्रितय-विलक्षणा शंखलिखितस्मृतिनाम्नाऽन्याऽप्यानन्दाश्रमेऽन्यत्राप्यान्ध्राक्षरे मुद्रिता दृश्यते॥

No. 118 (A 136/8).

लिखितस्मृतिः.

Likhita Smṛtiḥ.

Author—Likhita.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—50–67.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

वसिष्ठाद्याश्च मुनयो लिखितं धर्मरूपिणम्।
पप्रच्छुर्धर्मशास्त्राणि वेदान्तानि द्विजन्मनाम्॥
चातुर्वर्ण्यस्य धर्माणि प्रायश्चित्तान्यशेषतः।
वक्तुमर्हसि ब्रह्मर्षे कण्वात्मज महामते॥
साधु साधु महाप्राज्ञ सर्वशास्त्रविशारद।
विहितादीन् विवक्ष्यामि संग्रहेण यथामति॥

लिखितः—

निशान्त्ययामो विज्ञेयो यामार्धं सन्धिरुच्यते ।
तत्काले तु समुत्थाय विण्मूत्रं विसृजेद्बुधः ॥

End :—

अनधीत्य तु यो विद्वान् शास्त्रादिपठने रतः ।
शूद्रतुल्यस्स विज्ञेयो नरकायोपपद्यते ॥
नाचारफलमाप्नोति यथा शूद्रस्तथैव सः ।
अनध्याये तु गायत्री सहस्रावृत्तिनी यदि ।
स्वयं भवति सा क्रुद्धा तस्य भाग्यक्षयंकरी ॥

Colophon :—

इति लिखितस्मृतौ षष्ठोऽध्यायः ॥ लिखितस्मृतिस्समाप्ता ॥

Subject :—

This is a work in six chapters and deals with the duties to be performed in the morning: answering calls of nature, bath, Sandhyā, etc.; the method of writing out the Dhyāna Yantra of Gāyatri; the description of the five daily sacrifices or the Pañcamahāyajñas, the sixteen samskāras, the rules of conduct of a Brahmacārin, the mode of performing the śrāddhas, etc.

प्रतिपाद्यविषयः—

अत्र षडध्यायास्सन्ति । तत्र प्रथमेऽध्याये—मूत्रपुरीषोत्सर्गादि स्नानान्तं प्रातःकरणीयं कर्म, द्वितीये—संध्याविधिः, पवित्रधारणादिविधिश्च; तृतीये—गायत्रीध्यानयन्त्रलेखनादिक्रमः, चतुर्थे—संध्यात्रयोपासनक्रमः, पञ्चमे—पञ्चमहायज्ञाः, श्राद्धविधिश्च, षष्ठे—गर्भाधानादिसंस्काराः, तत्कालाः, ब्रह्मचारिनियमाः, अष्टकादिश्राद्धानि, मन्वादयः, अनध्याया इत्येते निरूप्यन्ते ॥

Noteworthy Features.—This has been printed in Madras in Telugu characters and is different from that described under No. 117.

वक्तव्यविशेषः—

आन्ध्राक्षरे मुद्रितेयं स्मृतिः, No. 117 तमकोशदृश्यमानस्मृतितो विलक्षणा च ॥

No. 119 (A 669/19).

लिखितस्मृतिः.

Likhita Smṛtiḥ.

Author—Likhita.
Substance—Paper.
Size—13 × 8⅜ inches.
Character—Telugu.
Folios—177-182.
Lines on a page—38.
Letters in a line—28.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, end, etc.—As in No. 118.

No. 120 (3798/1).

***लिखितस्मृतिः.**

*Likhita Smṛtiḥ.

Author—Likhita.
Substance—Palm-leaf.
Size—15¾ × 1¼ inches.
Character—Grantha.
Folios—1-8.
Lines on a page—8.
Letters in a line—48.
Age of MS—Old.

Condition of MS—Good
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

लिखितं गुरुमासीनमुपगम्य मुनीश्वराः ।
धर्मशास्त्राणि पप्रुच्छुरादरेण महामतिम् ॥

लिखितः—

शृणुध्वमृषयस्सम्यक् सर्वधर्मान् द्विजोत्तमाः ।

कर्मादौ कर्ममध्ये च कर्मान्ते च हरिं स्मरेत्।
प्रायश्चित्तमिदं तस्य श्रुतिस्मृतिषु पठ्यते॥
अघर्मपाणि यत्कर्म कुरुते सर्वमासुरम्।
पुण्ड्राचमनहीनो वा प्राणायामविवर्जितः॥
कर्मान्ते तु हरिं स्मृत्वा कर्मसिद्ध्यै द्विजोत्तमः।
यं यं कामयते मर्त्यस्तं तं सर्वमवाप्नुयात्॥

End:—

श्रुतिस्मृतिपुराणानि योऽर्थवादमितीरयेत्।
भेत्तव्यं तस्य जिह्वाग्रमित्याह लिखितो मुनिः॥
श्रुतिस्मृती मम श्रोत्रे पुराणान्यास्थिसंचयः।
वेदाङ्गानि ममाङ्गानि तद्भक्ता स्त्वं त्वहं परम्॥
लिखितस्य स्मृतिं यो वै शृणुयाद्धर्मवित्तमः।
पठेद्वा श्राद्धकाले तु सोऽच्युतं पदमाप्नुयात्॥

Colophon:—

लिखितस्मृतिस्समाप्ता॥ हरिः ओम्॥

Subject:—

Deals with such miscellaneous topics as the need for the utterance of the name of Hari before and after the performance of a religious act; pollution on seeing a Pātaki, rules of dining and about bowing to parents, mode of worship of Śiva and Viṣṇu, of performing tarpaṇa and śrāddhas; sites suitable for constructing Śiva and Viṣṇu temples, etc.

प्रतिपाद्यविषयः—

कर्माद्यन्तयोर्हरिकीर्तनं, कृतादियुगभेदेन पातकिदर्शनादिना पातकसंभवः, यतिव्रतिनोस्ताम्बूलवर्जनं, मूत्रोत्सर्गादौ गण्डूषसङ्ख्या, मात्रादिप्रणामविधिः, सपत्नीपुत्रेणैवेतरासामपि पुत्रवत्त्वं, वपनकालः, अन्तर्वत्न्युपगमननियमः, पङ्क्तिभेदकाः, तर्पणाविधिः, सात्त्विकराजसतामसतीर्थानि, विष्णुशिवालयनिर्माणयोग्यदेशः, तत्पूजापौर्वापर्यादि, यज्ञोपवीतधारणादिविधिः, मातापितृमृतिवत्सरे श्राद्धभोजनानर्हत्वं,

अन्नदानार्हपात्रं, शूद्रस्य पूर्वकच्छधारणनिषेधः, उत्तममध्यमाधमवित्तानि, द्रव्यदातृप्रतिग्रहशुद्धिः, प्राणभयापादकसत्कर्मणोऽपि त्याज्यत्वं, पतितद्विजादीनां प्रदक्षिणनिषेधः, वाग्यमार्हकर्माणि, विद्यासु तारतम्यं, शूद्रेण सहासनादिनिषेधः, अभ्यक्तनिषिद्धकर्माणि, पितृशेषभोजनं, एकादश्यां श्राद्धे पितृसेवितान्नाघ्राणं, एकादश्यां श्राद्धभोजने व्रतभङ्गाभावः, श्राद्धार्हाः, अन्ये च श्राद्धोपयुक्ताः कतिचन विषयाः, एकादश्यां श्राद्धनिर्णयः, शूद्रादिभ्यः प्रतिग्रहस्य त्याज्यत्वं, कर्मविशेषेषु कुशादीनामुपयोगः, पवित्रकरणविधिः, श्रुत्यादीनामर्थवादत्वकथने जिह्वाच्छेदः, अस्याः स्मृतेश्श्रवणपठनफलम् , इत्याद्यत्र प्रतिपाद्यते ॥

Noteworthy Features.—This is entirely different from the Likhita Smṛtis described above and is stated, in the colophon of MS. No. 121, to be the 27th chapter of the Brahmāṇḍa Purāna.

वक्तव्यविशेषः—

इदं च धर्मशास्त्रं द्विधा मुद्रितात् अत्रत्य No. 118 तमकोशान्तरदृश्यमानाच्च भिन्नं दृश्यते। No. 121 कोशे ब्रह्माण्डपुराणे सप्तविंशाध्यायरूपेयं स्मृतिरिति निर्दिश्यते॥

No. 121 (3154/5).

***लिखितस्मृतिः.**

*Likhita Smṛtiḥ.

Author—Likhita.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—24–32.
Lines on a page—8.
Letters in a line—52.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, end—As in No. 120.

Colophon:—

इति ब्रह्माण्डपुराणे लिखितस्मृतिस्समाविंशोऽध्यायः ॥

Subject:—

As in No. 120.

वक्तव्यविशेषः—

इयं स्मृतिः ब्रह्माण्डपुराणस्थेत्येतत्कोशान्ते लिखिता दृश्यते ॥

No. 122 (A 2852/5).

लिखितस्मृतिः.

Likhita Smṛtiḥ.

Author—Likhita.
Substance—Palm-leaf.
Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—183–189.
Lines on a page—9.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect–Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, end, etc.—As in No. 120.

No. 123 (A 136/11).

*लोहितस्मृतिः.

*Lôhita Smṛtiḥ.

Author—Lôhita.
Substance—Palm-leaf.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Kannada.

Folios—121-157.
Lines on a page—19.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

लोहितं सर्ववेदान्ततत्त्वज्ञं न्यायवित्तमाः ।
सामान्यज्ञानसंजातसंशयास्सर्ववस्तुषु ॥
विशेषं परिपप्रच्छुर्भार्यापुत्रधनादिषु ।
स्मार्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
इत्यत्र विद्यमानोऽग्निशब्दोऽयं संशयास्पदम् ॥
प्रधानलाजहोमाग्निर्विवाहाग्निरिति स्मृतः ॥

End:—

लोको यदा सुखी राजा तदा सर्वान्मनोरथान् ।
अवशादेव लभते नात्र कार्या विचारणा ॥
इतीदं कथितं शास्त्रं लोहितेन महात्मना ।
हिताय सर्वलोकानां सारमुद्धृत्य शास्त्रतः ॥

Colophon :—

इति लोहितस्मृतिस्समाप्ता ॥

Subject:—

The topics dealt with are the following: 1. A Brahmin is permitted to marry not more than five wives. 2. The first wife alone has the right to be the true Dharmapatni and a partner in all rites. 3. The fire kindled in the first marriage is sacred for performing Vedic rites. 4. Adoption and the division of property between the legitimate and the adopted sons. 5. The Dauhitrās, and their position, etc. 6. The widows and their stātus in life, etc. 7. The Pākayajñas, the śrāddhas. 8. The articles required for a śrāddha and persons fit to be invited to a śrāddha, etc.

प्रतिपाद्यविषयः—

अस्यां स्मृतौ प्रथमोढाया एव मुख्यं धर्मपत्नीत्वं, प्रथमविवाहाग्नेः प्राधान्यं, तत्रैवानले वैदिककर्मानुष्ठानं, ब्राह्मणादीनां पत्नीपञ्चकाभ्यनुज्ञा, अग्निनाशे पुनरग्निप्रतिष्ठा, धर्मपत्नीपुत्रस्यैव ज्यैष्ठ्यं, पुत्रप्रदानं, दत्तौरसयोर्दायविभागः, मृतभार्येण पुनरूढाया द्वितीयाया अपि धर्मपत्नीत्वं, औरसादिपुत्त्राः, पाकयज्ञादि, प्रथमानल एव कर्मणः कर्तव्यत्वं, पतितभार्यातत्सुतयोस्त्यागः, कलौ वर्ज्यानि, द्वादश पुत्त्राः, दौहित्रप्रशंसा, पुत्त्रदानस्वीकारविधिः, ज्येष्ठस्यादेयत्वं, दौहित्रत्रैविध्यं, श्राद्धोपयुक्तानि वस्तूनि, तदलाभे तत्प्रतिनिधयः, श्राद्धार्हानर्हविवेकः, श्राद्धे पक्कारः, ज्ञाताज्ञातादिविधवाविभागः, विधवाधर्माः, दुर्भगादयो दश विधवाः, विधवाया अस्वातन्त्र्यं ज्ञात्याद्यनुमतिश्च, दूषकादिषु राज्ञा प्रयोक्तव्या दण्डविशेषाः इत्येते प्रतिपाद्यन्ते ॥

Noteworthy Features.—This work has not yet been published. There are 3 copies of it in the India Office Library. (*Vide* No. 5393–95 of the Catalogue).

वक्तव्यविषयः—

कोशेऽस्मिन्नियं स्मृतिरसमग्रा दृश्यते, अमुद्रिता च ॥

No. 124 (A 669125).

*** लोहितस्मृतिः.**

*Lôhita Smṛtiḥ.

Author—Lôhita.
Substance—Paper.
Size—13×8⅜ inches.
Character—Telugu.
Folios—245–257.
Lines on a page—32.
Letters in a line—26.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 123.

No. 125 (C. 2085).

* वासिष्ठस्मृतिः.

*Vasiṣṭha Smṛtiḥ.

Author—Sage Vasiṣṭha.
Substance—Paper.
Size—$7\frac{15}{16}\times 4$ inches.
Character—Dēvanāgari.
Folios—1-37.
Lines on a page—15.
Letters in a line—36.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

गुरुमिक्ष्वाकुवंशस्य वसिष्ठं ब्रह्मसम्भवम् ।
पप्रच्छुर्मुनयस्सर्वे पराशरपुरोगमाः ॥
भगवन् भवता प्रोक्ता यज्ञदानव्रतादयः ।
वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृताम् ॥
अधुना श्रोतुमिच्छामि विप्राणां विष्णुसेविनाम् ।
कीदृग्विधाः प्रकर्तव्या नित्यनैमित्तिकाः क्रियाः ॥
वैष्णवानां मुनिश्रेष्ठ ब्रूहि सर्वमशेषतः ।

वसिष्ठः—

शृणुध्वं मुनयस्सर्वे सर्वधर्मं सनातनम् ।
वैष्णवानां च विप्राणां यद्यदाचरितं शुभम् ॥
सर्गादौ ब्रह्मणा सृष्टा वैष्णवत्वेन चोदिताः ।
इतरे च त्रयो वर्णा ब्रह्मणा विष्णुसेविना ॥
तस्माच्च वैष्णवा विप्राः प्रकृत्या द्विजसत्तमाः ।
अवैष्णवत्वं विप्राणां महापातकसम्मितम् ॥
अवैष्णवाश्च ये विप्राः सर्वकर्मसु गर्हिताः ।
रौरवं नरकं प्राप्य चाण्डालीं योनिमाप्नुयः ॥
नित्यं नैमित्तिकं काम्यं त्रिविधं श्रुतिचोदितम् ।
अवैष्णवानां विप्राणां कर्म तन्निष्फलं भवेत् ॥

यो महाविष्णुमन्येन हीनं देवेन दुर्मतिः ।
साधारणं सकृद्ब्रूते सोऽन्त्यजो नान्त्यजोऽन्त्यजः ॥
यो विष्णुशेषमात्मानमन्यशेषं प्रपद्यते ।
स चण्डालो महापापी रौरवं नरकं व्रजेत् ॥
अवैष्णवत्वं विप्राणामात्मनाशस्य कारणम् ।
तस्मात्तु वैष्णवत्वं हि विप्राणां श्रुतिचोदितम् ॥
अवैष्णवो हतो विप्रो हतं श्राद्धमदक्षिणम् ।
अब्राह्मण्यं हतं क्षत्रमनूचानहतं कुलम् ॥
स चण्डालो महापापी रौरवं नरकं व्रजेत् ।
न दासा वासुदेवस्य सर्वलोकेश्वरस्य ये ॥
तेषां हि नरके वासः कल्पायुतशतैरपि ।

End:—

वस्त्रालङ्कारयुक्तेन मधुपर्केण पूजयेत् ।
धूपं दीपं च नैवेद्यं ताम्बूलं च समर्पयेत् ॥
जपेदष्टोत्तरशतं मन्त्रद्वयमनुत्तमम् ।
प्रसादयेत्सुसान्निध्यमिति प्रासादयेद्गुरुम् ॥
ततः प्रदक्षिणं भूत्वा नमस्कुर्यात्पुनःपुनः ।
आशिषो वाचनं कुर्याद्वेदमन्त्रैश्शुभावहैः ॥
भोजयित्वा ततो विप्रान् सहस्रं तु शतं तु वा ।
दद्याद्वै दक्षिणां शक्तया ऋत्विजः पूजयेत्ततः ॥
गोभूहिरण्यवस्त्राद्यैराचार्यं परितोषयेत् ।
महोत्सवं पञ्चदिनं कुर्याच्छक्तयनुसारतः ॥
एवं प्रतिष्ठां कुर्वीत विष्णोरर्चाविधानतः ।
तत्र देवस्सुसान्निध्यं याति नारायणो हरिः ॥
प्रतिष्ठासु च कर्तव्यो विधिरेष उदाहृतः ।
गृहार्चने प्रकर्तव्यं विधिं वक्ष्यामि सत्तमाः ॥
स्नापयेत्पञ्चगव्येन मन्त्रपूतजलेन वै ।
मन्त्रेणावाहयेद्देवं परे व्योम्नि स्थितं विभुम् ॥
महाभागवतं स्पृष्ट्वा मन्त्ररत्नं जपेत्सुधीः ।
दद्यात्पुष्पाञ्जलिं पश्चात् तेनैव शतसङ्ख्यया ॥
आज्यं तेनैव होतव्यमष्टोत्तरशतं ततः ।

उपचारैस्समभ्यर्च्य नमस्कुर्याच्च भक्तितः ॥
वैष्णवान् भोजयेत्पश्चात् दक्षिणाभिः प्रपूजयेत् ।

Colophon :—

इति श्रीवसिष्ठस्मृतौ दशमोऽध्यायः ॥

Subject:—

This is a work in ten Adhyāyas or Chapters on the religious observances and duties of a Vaiṣṇava, duties of women, worship of Viṣṇu, Śraddha, Āśauca, rules for setting up the Viṣṇu idol, etc.

प्रतिपाद्यविषयः—

अध्यायदशकपरिमितायामस्यां स्मृतौ प्रथमाध्याये—अवैष्णवत्वविप्रकर्तृकत्रिपुण्ड्रधारणयोर्निन्दनपूर्वकं वैष्णवत्वोर्ध्वपुण्ड्रधारणे प्रशस्य होमपूर्वकतप्तशङ्खचक्रधारणावश्यकत्वं प्रतिपादितम् ॥

द्वितीये—शङ्खचक्रधारणजातकर्मनामकरणप्रकाराः प्रदर्शिताः ।

तृतीये—निष्क्रमणप्रभृतिस्नातकव्रतान्तसंस्कारा अभिहिताः ।

तुरीये—विवाहादिसीमन्तान्ताः संस्कारा निरूपिताः ।

पञ्चमे—स्त्रीधर्माः सङ्गृहीताः ।

षष्ठे—ब्राह्ममुहूर्तप्रबोधप्रभृतिनैत्यककर्मकलापोऽभिहितः ।

सप्तमे—नैमित्तिकभगवदाराधनप्रकारः प्रपञ्चितः ।

अष्टमे—दर्शपिण्डपितृयज्ञमातापित्रौर्ध्वदैहिककर्माणि प्रतिपादितानि ।

नवमे—जातमृताशौचे निरूपिते ।

दशमे—विष्णुप्रतिष्ठाविधिः संगृहीतः ॥

Noteworthy Features.—It is a complete copy of the work and is dated. It is stated at the end that the scribe Srinivasa, son of Rangācharya of Chitaldroog, completed writing the work on Monday, the seventh day of the bright half of Puṣhya of the year Rākṣasa, S. S. 1777, which corresponds to 14th January 1856 A.D.

वक्तव्यविशेषः—

स्मृतिरियं कोशेऽस्मिन् समग्रा दृश्यते । अमुद्रिता च ॥

कोशान्ते "शक 1777तमराक्षसाब्दपुष्यशुक्लसप्तमीचन्द्रवासरे कुण्डलीनृसिंहसन्निधौ समाप्तिमगमत् । चित्रदुर्गस्थरङ्गाचार्यसुत-श्रीनिवासेन लिखितम् ।" इति ग्रन्थलेखकनामधेयस्थललेखनकाल-निर्देशो दृश्यते ॥

No. 126 (1782/1).

*वसिष्ठस्मृतिः.

*Vasiṣṭha Smṛtiḥ.

Author—Sage Vasiṣṭha.
Substance—Palm-leaf.
Size—9⅛ × 1 inches.
Character—Nāgari.
Folios—1-90.
Lines on a page—5.
Letters in a line—36.
Age of MS—Old.
Condition of MS—Not good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

॥ श्रीमध्ववल्लभश्रीनारायणाय नमः ॥

गुरुमिक्ष्वाकुवंशस्य वशिष्ठं ब्रह्मसम्भवम् ।
पप्रच्छुर्मुनयस्सर्वे पराशरपुरोगमाः ॥

मुनयः—

भगवन् भवता प्रोक्ता यज्ञदानव्रतादयः ।
वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृताम् ।
अधुना श्रोतुमिच्छामो विप्राणां विष्णुसेविनाम् ॥

End:—

दद्यात्पुष्पाञ्जलिं पश्चात्तेनैव शतसंख्यया ।
आज्यं तेनैव होतव्यमष्टोत्तरशतं ततः ॥
उपयाचेत्तमभ्यर्च्य नमस्कुर्याच्च भक्तितः ।

वैष्णवान् भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥

Colophon :—

इति श्रीवशिष्ठस्य स्मृतौ विष्णुप्रतिष्ठाविधिर्नाम नवमोऽध्यायः ॥
श्रीकृष्णार्पणमस्तु ॥

Subject:—

As in No. 125.

Noteworthy Features.—This is an incomplete copy containing only the Chapters I—IX of the work.

No. 127 (1364/2).

***वसिष्ठस्मृतिः.**

†Vasiṣṭha Smṛtiḥ.

Author—Sage Vasiṣṭha.
Substance—Palm-leaf.
Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—27–64.
Lines on a page—9.
Letters in a line—56.
Age of MS—Old.

Condition of MS—Not good (some of the folios are broken).
Correct or incorrect—Not quite correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

मुनय ऊचुः—

भगवन् ब्रूहि विप्राणां जातकर्मादिसत्क्रियाः ।
नित्यनैमित्तिकं कर्म विष्णुपूजाविधिं परम् ।
आचक्ष्व विस्तरेणैव सर्वकर्माण्यशेषतः ॥

वशिष्ठः—

शृणुध्वमृषयस्सर्वे ब्राह्मणानां विशेषतः ।
वक्ष्यामि जातकर्मादि सर्वमेव विधानतः ॥
जाते पुत्रे पिता स्नात्वा पुत्रं दृष्ट्वा ऋणात्ततः ।
मुच्यते पैतृकात्तस्मात्सद्य एव द्विजोत्तमः ॥

End:—

अतो देवा इति जपन् सम्यक्संस्थापयेद्धरिम् ।
परव्योम्नि स्थितं देवं तस्मिन्नावाहयेद्धरिम् ॥
जप्त्वाऽथ मन्त्ररत्नं वै ध्यात्वा पुष्पाञ्जलिं क्षिपेत् ।
यथोक्तविधिना विष्णुमर्चयेदच्युतं हरिम् ॥

Subject:—

As in No. 125.

Noteworthy Features.—This is an incomplete copy containing Chapters 2—10 of the work.

वक्तव्यविशेषः—

कोशेऽस्मिन् द्वितीयाध्यायप्रभृति समग्रप्राय (श्लोकदशकन्यून) दशमाध्यायान्तेयं स्मृतिरुपलभ्यते ॥

No. 128 (3154/19).

***वसिष्ठस्मृतिः.**

*Vasiṣṭha Smṛtiḥ.

Author—Sage Vasiṣṭha.
Substance—Palm-leaf.
Size—$14\frac{1}{2} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—150–192
Lines on a page—8.
Letters in a line—50.
Age of MS—Old.

Condition of MS—Not good
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

शीतोष्णमुदकं नीत्वा पात्रे संयोजयेत्ततः ।
उष्णेन वाय इति च मन्त्रेणैवाभिषेचयेत् ॥

नवनीतं दधियुतं गृहीत्वा कांस्यपात्रके ।
तदैकविंशतिं दर्भानच्छिन्नाग्रान् सुकोमलान् ।
ब्रह्मस्थद्विजहस्तेन ग्राहयेत्सुसमाहितः ।
कुमारं मातुरुत्सङ्गे स्थापयेद्धापयेच्छिरः ॥
दक्षिणं पक्षमारभ्य शिरसि त्रिः प्रदक्षिणम् ॥

End:—

इष्ट्वा च वैष्णवं यज्ञं कुलमेकोत्तरं शतम् ।
उद्धृत्य परमं धाम प्रयात्येव न संशयः ॥
यत्कुले यजते सम्यग्वैष्णवीं पापनाशिनीम् ।
तत्कुलं वैष्णवत्वं च प्रयात्येव न संशयः ॥

Colophon :—

इति वासिष्ठस्मृतौ श्राद्धप्रकरणं नाम
अष्टमोऽध्यायः ॥

Subject:—

As in No. 125.

Noteworthy Features.—This is also an incomplete copy. It begins with the third chapter and ends with the eighth.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिः तृतीयाध्यायगतचौलप्रकरणमारभ्य अष्टमाध्यायान्ता दृश्यते ॥

No. 129 (136/12).

***वसिष्ठस्मृतिः.**

*Vasiṣṭha Smṛtiḥ.

Author—Sage Vasiṣṭha.
Substance—Paper.
Size—13¼ × 8 inches.
Character—Kannada.

Folios—158-174.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
सर्वज्ञानानन्दमयीं ब्रह्मरूपां नमाम्यहम् ।
देवीं सरस्वतीं सौम्यां शुद्धस्फटिकसन्निभाम् ॥
वीणापुस्तकहस्तां तां शुकशारिकसेविताम् ।
अक्षमालाविशेषज्ञां शुद्धामिन्दीवराननाम् ।
शुक्लवस्त्रपरीधानां भक्ताभीष्टप्रदायिनीम् ।
ध्यायाम्यहं हृत्सरोजे ग्रन्थस्यास्य चिकीर्षया ॥

End:—

यद्गृहे सुखिता पत्नी तद्गृहे सुखमेधते ।
स्वसमा सा प्रकथिता स्वाभिन्नतनुरुत्तमा ॥
सर्वाश्च संपदस्तस्याः पुत्रपौत्रादयोऽखिलाः ॥
तथेति तां मौढ्यतस्तु बालभावे वृथैव वै ॥
अत्यन्तचारिणीं कृत्वा गर्विष्ठां कारयन्न तु ॥

Subject:—

Deals with such topics as Śáuca or cleanliness of body, Ācamana or sacramental sipping of water, Dantadhāvana or brushing the teeth, snāna or bath, japa or meditation of Gāyatrī, Brahma Yajña and Vaiśvadeva.

प्रतिपाद्यविषयः—

अत्र प्रथमेऽध्याये—प्रातर्गुरुध्यानं, भूप्रार्थना, मलमूत्रोत्सर्गविधिः, शौचं, शुद्धाचमनं, दन्तधावनं, स्नानभेदाः, स्नानविधिः, इत्येते प्रतिपाद्यन्ते। द्वितीये—शुद्धाचमनविधिः, तृतीये पादशुद्ध्यादि शुद्धिपञ्चकं, प्राणायामविधिश्च, चतुर्थे—मार्जनविधिः, पञ्चमे—संध्यायामर्घ्यदानविधिः, षष्ठे—जपयोग्यस्थानादिविधिः, सप्तमे—गायत्रीजपविधिः, (अस-

मग्नोऽयं सप्तमोऽध्यायः, अष्टमनवमदशमाश्च लुप्ताः), एकादशे—ब्रह्मयज्ञविधिः। द्वादशे—वैश्वदेवविधिः, भोजनं, पत्युच्छिष्टभोजनं, भार्याया अहिंसनं, इत्येतानि निरूप्यन्ते ॥

Noteworthy Features.—It is a work in twelve chapters and is entirely different from the Vasiṣṭha smṛti described above as well as from that printed in Calcutta and Poona.

वक्तव्यविशेषः—

मुद्रितवसिष्ठस्मृतेः अत्रत्यलिखितकोशचतुष्टयपरिदृश्यमानवासिष्ठस्मृतेश्चेयं विभिन्ना दृश्यते ॥

No. 130 (A 669/26).

वसिष्ठस्मृतिः.

Vasiṣṭha Smṛtiḥ

Author—Sage Vasiṣṭha	Age of MS—Old.
Substance—Paper.	Condition of MS—Good.
Size—13×8⅞ inches.	Correct or incorrect—Correct.
Character—Telugu.	Complete or incomplete—Incomplete.
Folios—258–264.	Acquired or transcribed—Acquired.
Lines on a page—31.	
Letters in a line—30.	

Beginning, etc., as in No. 129.

No. 131 (3154/9).

***वाधूलस्मृतिः.**

*Vādhūla Smṛtiḥ.

Author—Sage Vādhūla.	Condition of MS—Good.
Substance—Palm-leaf.	Correct or incorrect—Correct.
Size—14¾ × 1½ inches.	Complete or incomplete—Complete.
Character—Grantha.	Acquired or transcribed—Acquired.
Folios—76–83.	
Lines on a page—9.	
Letters in a line—56.	
Age of MS—Old.	

Beginning :—

वाधूलं मुनिमासीनमभिगम्य महर्षयः।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥
भगवन् ब्राह्मणादीनामाचारं वद तत्त्वतः।
.... धर्मवत् ॥
ब्राह्मं मुहूर्तमारभ्य त्रिकाले विहितं तथा।
नित्यं नैमित्तिकं चैव प्रवक्ष्यामि यथामति ॥

End :—

यो मोहादथवाऽऽलस्यादकृत्वा केशवार्चनम्।
भुङ्क्ते स याति नरकं श्वानयोनिषु जायते।
अनृतं मद्यगन्धं च दिवास्वापं च मैथुनम्।
पुनाति वृषलस्यान्नं सायं सन्ध्या बहिष्कृता ॥
स्नानं सन्ध्याजपं होमं स्वाध्यायं पितृतर्पणम्।
देवताराधनं चैव वैश्व ....।
न कुर्याद्यदि मोहेन स चण्डालो न संशयः ॥ (ग्रन्थसंख्या २०३).

Colophon :—

वाधूलस्मृतिस्समाप्ता ॥

Subject :—

This work details the duties that are to be performed daily, starting from the *Brāhma muhūrta.*

प्रतिपाद्यविषयः—

अत्र ब्राह्ममुहूर्तमारभ्य कर्तव्यानि नित्यकर्माणि प्रतिपाद्यन्ते ॥

Noteworthy Features.—This is an unprinted work.

वक्तव्यविशेषः—

अमुद्रिता चेयं स्मृतिरत्र कोशे दृश्यते ॥

No. 132 (A. 136/16).

*विश्वामित्रस्मृतिः.

*Viśvāmitra Smṛtiḥ.

Author—Sage Viśvāmitra.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Kannada.
Folios—215-241.
Lines on a page—19.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning :—

अथ विश्वामित्रस्मृतिः—

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभे
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि पावनं तदभिधानपूर्वं गुरुम् ॥

चतुःपञ्चघटीमानं मुहूर्तं ब्राह्मसंज्ञितम् ।
[1]उषः पञ्चघटीमानं प्रातःकाल इति स्मृतः ॥

एवं ज्ञात्वा प्रभाते तु नित्यकर्म समाचरेत् ।
नित्ये नैमित्तिके काम्ये कृते काले तु सत्फलम् ॥

ब्राह्मे मुहूर्त उत्थाय कृत्वा शौचं समाहितः ।
स्नानं कुर्यादुषःकाल आत्मार्थमरुणोदये ॥

End :—

श्राद्धान्ते वैश्वदेवार्थं पाकं कृत्वा प्रयत्नतः ।
हुत्वा दत्त्वा च भुक्त्वा च द्विजश्चान्द्रायणं चरेत् ॥

देवानां च ऋषीणां च पितॄणां च विशेषतः ।
पर्यायेण प्रदातव्यं श्राद्धकाले हविर्द्विजैः ॥

देवर्षिपितृतुष्ट्यर्थमेकपाको विधीयते ।
पृथक्पाको न कर्तव्यः कृतश्चेत्पतितो भवेत् ॥

---

[1] 'पञ्चपञ्चघटीज्ञेय उषःकाल इतीष्यते । ऋतुबाणघटीमानमरुणोदयसंज्ञितम् ॥' इति श्लोकोऽधिको (A 669 कोशे) दृश्यते । ' अष्टपञ्च ' इति पाठान्तरं कोशान्तरे.

अकृत्वाऽन्नं तु नैवेद्यं यः कुर्यात्कव्यसंकुलम् ।
होमं कृत्वा प्रयत्नेन वैश्वदेवं प्रकल्पयेत् ॥

Colophon :—

इति विश्वामित्रस्मृतौ वैश्वदेवप्रकरणं नाम दशमोऽध्यायः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

Subject :—

This work describes the daily duties, such as, Snāna, Ācamana, Sandhyā, japa, the Pancamahāyajñas and the time prescribed for performing them.

प्रतिपाद्यविषयः—

अत्र दशाध्यायास्सन्ति, प्रथमाध्यायान्तिमभागः द्वितीयाध्यायादिभागश्च लुप्तौ ॥

तत्र प्रथमेऽध्याये कर्मणां यथोक्तकालकर्तव्यत्वं, कालातिक्रमे दोषः, प्रातःकालकर्तव्यं, संध्याकालः, संध्यायाः कालातिक्रमदोषश्च, द्वितीये—दन्तधावनस्नानाचमनादीनि, तृतीये — प्राणायामविधिः, चतुर्थे—आपोहिष्ठेत्यादिमन्त्रैर्मार्जनम्, पञ्चमे—संध्यास्वर्घ्यदानं, षष्ठसप्तमाष्टमेषु—गायत्रीजपविधिः, (एतेष्वध्यायेषु ग्रन्थलोपः), नवमे—संध्योपस्थानं, दशमे—पञ्चमहायज्ञाश्च निरूपिताः ॥

Noteworthy Features.—This is a work in ten chapters and has not yet been printed anywhere. The manuscript is complete in itself excepting for a few lacunae at the end of the first chapter and in the beginning of the second.

वक्तव्यविशेषः—

कोशेऽस्मिन् No. 135 कोशदृश्यमानग्रन्थापेक्षया क्वचित्क्वचिन्न्यूनाधिकभावपाठभेदाध्यायविभागभेदादिकं दृश्यते। No. 135 कोशान्तरे आदौ दृश्यमानः प्रबोधकालकर्तव्यः कुण्डलिन्यां गायत्रीध्यानप्रकारः शौचविधिश्चाऽत्र न दृश्यते । वैश्वदेवप्रकरणे तत्रापरिदृश्य-

अकृत्वाऽन्नं तु नैवेद्यं यः कुर्यात्कव्यसंकुलम् ।
होमं कृत्वा प्रयत्नेन वैश्वदेवं प्रकल्पयेत् ॥

Colophon :—

इ,त विश्वामित्रस्मृतौ वैश्वदेवप्रकरणं नाम दशमोऽध्यायः ॥

॥ समाप्तश्चायं ग्रन्थः ॥

Subject :—

This work describes the daily duties, such as, Snāna, Ācamana, Sandhyā, japa, the Pancamahāyajñas and the time prescribed for performing them.

प्रतिपाद्यविषयः—

अत्र दशाध्यायास्सन्ति, प्रथमाध्यायान्तिमभागः द्वितीयाध्यायादिभागश्च लुप्तौ ॥

तत्र प्रथमेऽध्याये कर्मणां यथोक्तकालकर्तव्यत्वं, कालातिक्रमे दोषः, प्रातःकालकर्तव्यं, संध्याकालः, संध्यायाः कालातिक्रमदोषश्च, द्वितीये—दन्तधावनस्नानाचमनादीनि, तृतीये —— प्राणायामविधिः, चतुर्थे—आपोहीत्यादिमन्त्रैर्मार्जनम् , पञ्चमे—संध्यास्वर्घ्यदानं, षष्ठसप्तमाष्टमेषु—गायत्रीजपविधिः, (एतेष्वध्यायेषु ग्रन्थलोपः), नवमे—संध्योपस्थानं, दशमे—पञ्चमहायज्ञाश्च निरूपिताः ॥

Noteworthy Features.—This is a work in ten chapters and has not yet been printed anywhere. The manuscript is complete in itself excepting for a few lacunae at the end of the first chapter and in the beginning of the second.

वक्तव्यविशेषः—

कोशेऽस्मिन् No. 135 कोशादृश्यमानग्रन्थापेक्षया कचित्कचिन्न्यूनाधिकभावपाठभेदाध्यायविभागभेदादिकं दृश्यते। No. 135 कोशान्तरे आदौ दृश्यमानः प्रबोधकालकर्तव्यः कुण्डलिन्यां गायत्रीध्यानप्रकारः शौचविधिश्चाऽत्र न दृश्यते। वैश्वदेवप्रकरणे तत्रापरिदृश्य-

मानो रण्डापाकनिषेधनपरग्रन्थभागोऽत्राधिको दृश्यते। अन्यत्र तु तत्र तत्र बहुशः तद्ग्रन्थसाम्यं दृश्यते। अमुद्रितेयं स्मृतिः समग्रा चास्मिन् कोशे अशुद्धदूषिता दृश्यते॥

No. 133 (A 669/24).

*विश्वामित्रस्मृतिः.

*Viśvāmitra Smṛtiḥ.

Author—Sage Viśvāmitra.
Substance—Paper.
Size—13×8⅜ inches.
Character—Telugu.
Folios—234–243.
Lines on a page—35.
Letters in a line—28.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—
Acquired or transcribed—Acquired.

Beginning, end, etc., as in No. 132.

No. 134 (2235).

*विश्वामित्रस्मृतिः.

*Viśvāmitra Smṛtiḥ.

Author—Sage Visvāmitra.
Substance—Palm leaf.
Size—15¾ × 1⅛ inches.
Character—Telugu.
Folios—1–45.
Lines on a page—6.
Letters in a line—59.
Age of MS—Old.
Condition of MS—Not good (worm-eaten.)
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning :—

As in No. 132.

End :—

षड्भिराद्यैर्हुनेदन्नं प्रागग्नौकरणं द्विजः ।
श्राद्धान्ते वैश्वदेवा(र्थं) पाकं कृत्वा प्रयत्नतः ॥
हुत्वा दत्त्वा च भुक्त्वा च द्विजश्चान्द्रायणं चरेत् ।
देवानां च ऋषीणां च पितॄणां च विशेषतः ॥
. . . . ये . . . . . .

Subject, etc., as in No. 132.

No. 135 (1364/1).

*विश्वामित्रसंहिता.

*Viśvāmitra Samhita.

Author—Sage Viśvāmitra.
Substance—Palm leaf.
Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—1–26.
Lines on a page—9.
Letters in a line—56.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—

Beginning:—

अजस्रमदनिष्यन्दलहरीललितालकैः ।
कबलीकृतविघ्नाय पुराणकरिणे नमः ॥
ताम्बूलाङ्कुरितां सूक्ष्मां नाभौ पल्लवितां पराम् ।
हृदि कोरकितां वाणीं वक्त्रे . . . . ॥
सहस्रदलपङ्कजं सकलशीतरश्मिप्रभं
वराभयकराम्बुजं मल . . गन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि....भिधानपूर्वं गुरुम् ॥
स्वगुरुं पूजयेद्देवमुपचारैस्तु पञ्चकैः ।
भक्तिश्रद्धानुसारेण विश्वामित्रस्त्वकल्पयत् ॥
प्रातरुत्थाय यो विप्रः स्वात्ममूलं तु कुण्डलीम् ।
प्रबोधेषु प्रभातायां गायत्रीं तत्र चिन्तयेत् ॥

End:—

दिनान्ते त्रिविभागेन बलिदानं प्रदापयेत् ।
प्रत्यहं पाकमुत्पाद्यं प्रथमं वह्निदैविकम् ॥
भागं कुर्यात्प्रदातव्यं नैवेद्यानन्तरं बलिः ।
विधिनाऽविधिना चैव वैश्वदेवं न सन्त्यजेत् ॥
अन्नसंस्कारसिद्ध्यर्थं कुर्यान्नित्यं षडाहुतीः ।
देवा मनुष्याः पशवो वयांसि
सिद्धास्सयक्षा गजदैत्यवर्गाः ।
प्रेताः पिशाचाप्सरसस्समस्ता
ये चान्नमिच्छन्ति मया च दत्तम् ॥
इत्युक्त्वा सर्वभूतेभ्यो बलिं दद्याद्यथाहविः ।
तत आचम्य विधिवत् . . . . ॥

Subject:—

As in No. 132.

प्रतिपाद्यविषयः—

कोशेऽस्मिन् एकादशाध्याया दृश्यन्ते–तत्र प्रथमे प्रातः प्रबुद्धेन कुण्डलिन्यां गायत्रीध्यानं, ततो मूत्रपुरीषोत्सर्गशौचदन्तधावनस्नान पुण्ड्रधारणानां विधिः; द्वितीये–आचमनविधिः, तृतीये प्राणायामप्रपञ्चनं तुरीये—मार्जनप्रकारः, पञ्चमे—अर्घ्यदानप्रकारः, षष्ठसप्तमाष्टमेषु आवा हनमुद्रादिनिरूपणपूर्वकं जपविधिः, नवमे– नित्यौपासनप्रकारः, दशमे — ब्रह्मयज्ञविधिः, एकादशे — वैश्वदेवश्राद्धादिविधयश्च संगृहीत दृश्यन्ते ॥

Noteworthy Features.—The subject matter of th work is divided here into 12 chapters. It, howeve appears to be identical with that described above unde No. 132 excepting for a few variations in reading an division into chapters.

वक्तव्यविशेषः—

No. 132 कोशापेक्षयाऽत्र क्वचित्क्वचित्पाठभेदग्रन्थन्यूनाधिक भावाध्यायविभागवैलक्षण्यादिकं दृश्यते । तत्र वैश्वदेवप्रकरणपरिदृश्य मानः श्राद्धे रण्डापाकनिषेधपरः कर्मणां यथोक्तकालकर्तव्यत्वप्रशंस परश्च ग्रन्थभागोऽत्र न दृश्यते । बहुधा ग्रन्थसंवादः परं दृश्यते । अ द्रिता चेयं स्मृतिरत्र कोशे समग्रप्राया दृश्यते ॥

No. 136 (3154/1).

* विष्णुस्मृतिः.

*Viṣṇu Smṛtiḥ.

Author—Viṣṇu.
Substance—Palm-leaf.
Size—$14\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—1–4.
Lines on a page—8.
Letters in a line—58.
Age of MS—Old.

Condition of MS—Not quite good.
Correct or incorrect–Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

विष्णुं वेदविदां श्रेष्ठमभिगम्य मुनीश्वरम् ।
पप्रच्छुर्मुनयस्सर्वे धर्मान्नो ब्रूहि शाश्वतान् ।
ऋषिर्विष्णुर्नमस्कृत्वा नारायणमनामयम् ।
तानब्रवीन्मुनीन् सर्वान् श्रूयतां धर्मनिर्णयम् ।
अस्नाताशी मलं भुङ्क्ते ह्यजपः पूयशोणितम् ।
अहुताशी क्रिमिं भुङ्क्ते ह्यदाता विषमश्नुते ॥

End:—

दिवा स्वापं न कुर्वीत गच्छेन्नैव दिवा स्त्रियम् ।
आयुःक्षयकरी निद्रा दिवा स्त्री.पुण्यनाशिनी ॥
इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत् ।
वृथा विविधवाक्यानि परिवादांश्च वर्जयेत् ॥

Colophon:—

हरिः ओं ॥ विष्णुस्मृतिस्समाप्ता ॥

Subject:—

Treats of such minor topics as rules for dining and bath, impurity due to birth and death, etc.

प्रतिपाद्यविषयः—

ग्रन्थेऽस्मिन्—भोजननियमाः, जननमरणाशौचं, रजस्वलाशुद्धिः, ग्रहणकालिकादिविधयः, स्नानविधिः, निषिद्धधान्यशाकादिकं, दिवास्वापनिषेधादयश्चाभिहिता दृश्यन्ते ॥

Noteworthy Features.—Verses commencing from "अस्नाताशी मलं भुङ्क्ते" and ending with "स्नानं समाचरेत्" found in the Ātrêya Smṛti described under No. 10 are repeated. But for the additional 40 verses on the rules for bath, and the colophon at the end, this work would have been regarded as another version of Ātrêya Smṛiti.

वक्तव्यविशेषः—

कोशेऽस्मिन् दृश्यमानायां स्मृतौ No. 10 कोशे दृश्यमानायामात्रेयस्मृतावुपलभ्यमानाः 'अस्नाताशी मलं भुङ्क्ते' इत्यारभ्य 'स्नानं समाचरेत्' इत्यन्ता भोजननियमादिविधिपराः श्लोका एवादौ दृश्यन्ते। ततः परं च ततोऽधिकाः स्नानविध्यादिनिरूपणपराः 40 श्लोका दृश्यन्ते। अन्ते च विष्णुस्मृतिस्समाप्ता इति लेखनं दृश्यत इति तद्बलेनेदं विष्णुस्मृतिनाम्नाऽत्र निरदेशि ॥

No. 137 (C 353).

विष्णुस्मृतिः.

Viṣṇu Smṛtiḥ.

Author—Viṣṇu.
Substance—Paper.
Size—10¾ × 4¾ inches.
Character—Dēvanāgarī.
Folios—1-41.
Lines on a page—13.
Letters in a line—40.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

ब्रह्मरात्र्यां व्यतीतायां विबुद्धे पद्मसंभवे ।
विष्णुस्सिसृक्षुर्भूतानि ज्ञात्वा भूमिं जलान्तगाम् ।

जलक्रीडारुचिश्शुभ्रं कल्पादिषु यथा पुरा ।
वाराहमास्थितो रूपमुज्जहार वसुन्धराम् ॥
वेदपादो यूपदंष्ट्रः क्रतुवक्त्रश्चितीमुखः ।
अग्निजिह्वो धर्मरोमा ब्रह्मशीर्षो महातपाः ।
अहोरात्रेक्षणो दिव्ये वेदाङ्गश्रुतिभूषणः ।
आज्यनासोऽथ स्रुक्तुण्डः सामघोषस्वनो महान् ॥

End:—

शरीरकेऽस्मिन् सप्तशिराशतानि, धमनीशते द्वे, पञ्च पेशीशतानि, क्षुद्रधमनीनामेकोनत्रिंशल्लक्षाणि नवशतानि, षट्पञ्चाशच्च मन्यः, लक्षत्रयं श्मश्रुकेशकूपानां, सप्तोत्तरं मर्मशतम्, संधिशते द्वे, चतुःपञ्चाशद्रोमकोट्यः ॥

Subject:—

This is a work in prose and verse explaining in detail, in the form of a dialogue between Viṣṇu and Bhūdevi (Goddess of Earth), the various duties and privileges of the several Varṇas and Āśramas.

प्रतिपाद्यविषयः—

श्रीमहाविष्णुना भूदेव्यै प्रोक्ता वर्णाश्रमधर्मनियमाचारप्रतिपादिका गद्यपद्यात्मिकेयं वैष्णवी स्मृतिः प्रकरणानां (अध्यायानां) शतेन प्रविभक्ता मुद्रिता च दृश्यते । तत्रादौ-एतच्छास्त्रोपोद्घातः, चातुर्वर्ण्यधर्माः, त्रसरेण्वादिपरिमाणं, दण्डनविधिः, ऋणादानविधिः, लेख्यविधिः, साक्षिस्वरूपं, दिव्यप्रमाणनिरूपणं, द्वादशपुत्त्राः, वर्णजातिविवेकः, तदीया वृत्तिः, विभागकालादिकं, संसृष्टिविभागः, स्त्रीधनं, विजातीयविभागः, और्ध्वदैहिकाविधिः, अहोरात्रादिकालविभागः, आतुराश्वासनं, आशौचापगमानन्तरकालिककृत्यं, जननमरणाशौचं, द्रव्यशुद्धिः, विवाहविधिः, स्त्रीधर्माः, गर्भाधानादिसंस्काराः, ब्रह्मचारिधर्माः, आचार्यकविधिः, उपाकर्म, अनध्ययनकालाः, अध्ययनफलम्, तन्नियमः, अतिपातकमहापातकतत्समपातकोपपातकजातिभ्रंशकरसंकरीकरणा - पात्रीकरणमलिनीकरणप्रकीर्णकाख्यानां पापानां परिगणनं, तत्प्रायश्चित्तं नरकाः, पातकिनां कर्मविपाकः, कृच्छ्राणां लक्षणं, रहस्यप्रायश्चित्तं, गृहिधर्माः, आह्निकविधिः, दमयमप्रशंसनं, श्राद्धविधिः, अष्टकादिश्राद्धविशेषाः, काम्यश्राद्धानि, पङ्क्तिपावनाः, श्राद्धदेशाः, वृषोत्सर्गः, कृष्णाजिना-

भयतोमुखीदानादि, दानपात्रानुगुणफलविशेषाः, वानप्रस्थधर्माः, संन्यासिधर्माः; ज्ञानाधिगमोपायाः, श्रीविष्णुलक्ष्मीस्तुतिः, एतच्छास्त्राध्ययनफलम्, इत्येतत्सर्वमत्र यावदपेक्षितं सुललितयैव शैल्या नातिव्यासमभिधीयते ॥

Noteworthy Features.—This is an incomplete copy of the work containing only 96 chapters. Chapters 91-96 are missing. The work has been printed in Bombay and Calcutta. It is to be distinguished from the Laghu Viṣṇu Smṛti printed in the Ānandāśrama Series and the Viṣṇu Smṛti in two chapters described under No. 138.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिः असमग्रषण्णवतितमाध्यायान्ता दृश्यते। अन्ते 91तमाध्यायप्रभृति 94तमाध्यायान्तं ग्रन्थलोपो दृश्यते। इयं त्र शताध्यायात्मिका स्मृतिः मोहमयीकलकत्तानगरयोर्मुद्रिता दृश्यते। अन्याऽप्येतद्विलक्षणा लघुविष्णुनामा स्मृतिः आनन्दाश्रमे मोहमय्यां च मुद्रिता दृश्यते। एतदुभयविलक्षणाऽपराऽपि विष्णुस्मृतिरमुद्रिता अध्यायद्वितयपरिमिता कोशालयेऽस्मिन् No. 138, 139, 140 कोशेषु दृश्यते। एतत्त्रितयविलक्षणेतराऽपि काचिद्विष्णुस्मृतिरादावत्रिस्मृतिपारदृश्यमानबहुश्लोकघटिता अनाकलिताध्यायविभागा संगृहीता No. 136 कोशे दृश्यते ॥

No. 138 (A 136/15).

***विष्णुस्मृतिः.**

*Viṣṇu Smṛtiḥ.

Author—Viṣṇu.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Kannada.
Folios—202-214.
Lines on a page—19.
Letters in a line—16.
Age of MS—Old.

Condition of MS—Good
Correct or incorrect—
Not quite correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning:—

विष्णो धर्मानशेषेण ब्रह्मज्ञानैकसाधकान् ।
चित्तशुद्धिकरान् सद्यश्शिष्येभ्यो वद नः प्रभो ॥
इति संप्रार्थितो विष्णुः श्रीमान् ब्रह्मविदां वरः ।
नत्वा नारायणं देवं वेदवेद्यं सनातनम् ॥
वक्तुं धर्मान् द्विजातीनां निखिलांस्तान् द्विजाग्रणीः ।
हरिरोमित्युपक्रम्य शृणुतेति वचोऽब्रवीत् ॥

End:—

श्रेयस्करं हितं वाक्यं यद्यदत्यन्तमप्रियम् ।
प्राणिनामुपकाराय यदेवेह परत्र च ॥
कर्मणा मनसा वाचा तदेव मतिमान्वदेत् ।
प्राणिनां निखिलानां च ह्युपकारं समाचरेत् ।
अपकारं न वै कुर्यादिति वेदानुशासनम् ।

Colophon:—

इति विष्णुस्मृतौ द्वितीयोऽध्यायः ॥

Subject:—

Details the duties common to all castes and stages of life like Ahimsa as well as special duties like Dāna, Yajña, the duties of a Brahmacārin, Gṛhastha, Vanaprastha and Yati, the Samskaras, the various kinds of marriage, the daily duties of a householder like Sandhya Japa, Homa.

प्रतिपाद्यविषयः—

अध्यायद्वितयवत्तयाऽत्र दृश्यमानायामस्यां स्मृतौ प्रथमाध्याये—अहिंसादयस्सामान्यधर्माः, दानयज्ञादयो विशेषधर्माः, विप्रादीनामापद्धर्माः, ब्रह्मचारिधर्माः, पितृयज्ञादयो गृहस्थधर्माः, वानप्रस्थधर्मा यतिधर्माश्च निरूप्यन्ते ॥

द्वितीये—जातकर्मादिविवाहान्तकर्मणां कालाः, विवाहभेदाः, मूत्रपुरीषोत्सर्गविधिः, शौचं, नित्यस्नानं, सन्ध्यानुष्ठानं, जपविधिः, गायत्र्यर्थकथनं, आदित्योपस्थानं, औपासनं, समित्पुष्पाद्याहरणं, पञ्चायतनपूजा, सालिग्रामपूजा, वैश्वदेवं, अतिथिसत्कारः, भोजनं, सायंसन्ध्यादि, अभ्यागतादिप्रशंसा, भोजननियमादयो गृहस्थधर्माश्च प्रतिपाद्यन्ते ॥

Noteworthy Features.—This is a work in two chapters by a Brahmin, Viṣṇu by name and is entirely different from the Viṣṇu Smṛti described above.

वक्तव्यविशेषः —

कोशेऽस्मान्नियं स्मृतिः No. 136 तमकोशदृश्यमानविष्णुस्मृतिविलक्षणा मुद्रितविलक्षणा च दृश्यते ॥

नत्वा नारायणं देवं वेदवेद्यं सनातनम् ।
वक्तुं धर्मान् द्विजातीनां निखिलांस्तान् द्विजाग्रणीः ॥

इत्युपोद्घातदर्शनात् अध्यायद्वयपरिमितेयं स्मृतिः केनाचिद्विष्णुनाम्ना द्विजेन प्रणीता, न तु भगवता नारायणेनेति ज्ञायते ॥

No. 139 (A 669/21).

*विष्णुस्मृतिः.

*Viṣṇu Smṛtiḥ.

Author—Viṣṇu.
Substance—Paper.
Size—13 × $8\frac{8}{8}$ inches.
Character—Telugu.
Folios—198-201.
Lines on a page—35.
Letters in a line—32.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 138.

No. 140 (B 193)

*विष्णुस्मृतिः.

*Viṣṇu Smṛtiḥ.

Author—Viṣṇu.
Substance—Paper.
Size—$7\frac{7}{8}$ × 6 inches.
Character—Telugu.
Folios—1-20.
Lines on a page—11.

Letters in a line—18.
Age of MS.—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning, etc., as in No. 138.

No. 141 (4487/3).

व्यासस्मृतिः.

Vyasa Smṛtiḥ.

Author—Vyāsa.
Substance—Palm leaf
Folios—11–17.
Lines on a page—11.
Letters in a line—48.
Age of MS—Old.
Condition of MS—Good.
Size—10 × 2 inches.
Character—Nāgari.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

ऋषय ऊचुः—

अहन्यहनि कर्तव्यं ब्राह्मणानां महामुने।
तदाचक्ष्वाखिलं कर्म येन मुच्येत बन्धनात्॥

व्यास उवाच—

विप्रास्समाहितास्त्वद्य शृणुध्वं वदतो मम।
अहन्यहनि कर्तव्यं ब्राह्मणानां क्रमाश्रितम्॥
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत्।
कायक्लेशांश्च तन्मूलान् वेदतत्वार्थमेव च॥
उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि॥
प्रातस्स्नानेन पूयन्ते येऽपि पापकृतो जनाः।
तस्मात्सर्वप्रयत्नेन स्नानं प्रातस्समाचरेत्॥

प्रातस्स्नानं प्रशंसन्ति दृष्टादृष्टकरं शुभम् ।
ऋषीणामृषिता नित्यं प्रातस्स्नानान्न संशयः ॥
मुखे सुप्तस्य सततं लालाद्याश्च स्रवन्ति हि ।
ततो नैवाचरेत्कर्म अकृत्वा स्नानमादितः ॥

Colophon:—

इति व्यासस्मृतौ द्वितीयोऽध्यायः ॥

End:—

ततस्सन्ध्यामुपासीत पूर्वोक्तविधिना ततः ।
आसीनस्तु जपेद्देवीं गायत्रीं पश्चिमां प्रति ॥
न तिष्ठति तु यः पूर्वामुपास्ते न तु पश्चिमाम् ।
स शूद्रवत्समो लोके सर्वधर्मविवर्जितः ॥
हुत्वाऽग्नौ विधिवन्मन्त्रैः भुक्त्वा यज्ञावशिष्टकम् ।
सभृत्यबान्धवजनैः स्वपेच्छुष्कपदो निशि ॥
नोत्तराभिमुखस्स्वप्यात् पश्चिमाभिमुखो न हि ।
न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित् ॥
जीर्णायां तु न खट्वायां शून्यागारे न चैव हि ।
न तथांशे न पालाशे शयने वा कदाचन ॥
इत्येतदखिलेनोक्तमहन्यहनि वै मया ।
ब्राह्मणानां कृतं जातमपवर्गफलप्रदम् ॥
नास्तिक्यादथवाऽऽलस्याद्ब्राह्मणो न करोति यः ।
नान्यो विमुक्तये बन्धान्मुक्त्वाऽऽश्रमविधिं स्वकम् ॥
तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः ।

Colophon:—

इति व्यासस्मृतौ तृतीयोऽध्यायः ॥

Subject:—

This is a Smṛti in three chapters describing the ordinary daily duties of a householder, such as getting up from the bed in the Brāhmīmuhūrta, washing the teeth, Bath, Sandhyā, homa, study, worship, Vaiśvadeva, etc.

Colophon:—

इति वैयासिके धर्मशास्त्रे द्वितीयोऽध्यायः.
सम्पूर्णं चेदं धर्मशास्त्रम्.

Noteworthy Features.—The contents of the work are divided into two chapters, instead of three, as in No. 141.

वक्तव्यविशेषः—

कोशेऽस्मिन् इयं स्मृतिरध्यायद्वयेन विभक्ता दृश्यते। शिष्टं पूर्वकोशवदेव ॥

No. 143 (2852/10).

व्यासस्मृतिः.

Vyāsa Smṛtiḥ.

Author—Vyāsa
Substance—Palm leaf.
Size—$19\frac{1}{8} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—204-207.
Lines on a page—9.
Letters in a line—60.
Age of MS—Old.

Condition of MS—
Not good (worm eaten.)
Correct or incorrect—
Not quite correct.
Complete or incomplete—
Complete.
Acquired or transcribed—
Acquired.

Beginning, etc., as in No. 141.

Noteworthy Features:—The contents are not divided into chapters.

वक्तव्यविशेषः—

अत्राध्यायविभागो न दृश्यते। तत्र तत्र पूर्वकोशाद्दृश्यमानात् पाठभेदश्च दृश्यते ॥

No. 144 (3534/5).

व्याससस्मृतिः.

Vyāsa Smṛtiḥ.

Author—Vyāsa.
Substance—Plam leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.
Folios—217-223.
Lines on a page—8.
Letters in a line—40.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning, etc., as in No. 141.

No. 145 (1684/9).

***व्याससस्मृतिः.**

*Vyāsa Smṛtiḥ.

Author—Vyāsa Ṛṣi.
Substance—Palm-leaf.
Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Grantha.
Folios—31-38.
Lines on a page—8.
Letters in a line—44.
Age of MS—New.

Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

ऋषयः—

भगवन् ब्रूहि सर्वज्ञ कर्तव्यं कर्म तत्वतः ।
ब्राह्मणानां मुमुक्षूणां वैष्णवानां महामुने ॥
हरेरर्चाविधिं चैव देवदेवस्य शार्ङ्गिणः ।

व्यास उवाच—

प्रवक्ष्यामि मुनिश्रेष्ठा द्विजानां विष्णुसेविनाम् ।
यद्यदाचरणं कर्म पवित्रं पापनाशनम् ।
गुह्यं सनातनं यद्धि हरेराराधनं परम् ।
विष्णोराराधनादन्यत्साधनं नास्ति मुक्तये ।
तदेव परमो धर्मस्तदेव परमं तपः ।
तदेव परमं श्रेयस्तदेव परमं धनम् ।
तस्मात्सर्वप्रयत्नेन तमुपास्यथ सङ्गताः ॥

End:—

वैष्णवी पतिना हीना शिरःक्षौरं समाचरेत् ।
यदि कुर्यात्तु मोहेन रौरवं नरकं व्रजेत् ॥
तस्मात्तु भर्तृहीनायाः क्षुरकर्म निषिध्यते ।
एवंविधसमायुक्ताः पञ्चसंस्कारसंस्कृताः ।
नारायणपरा नार्यः प्राप्नुवन्ति परां गतिम् ॥
एतद्गुह्यतमं शास्त्रं श्रुत्वा ते मुनिपुङ्गवाः ।
भगवन् योगिनां श्रेष्ठ त्वत्प्रसादाज्जगद्गुरो ॥
कृतार्था ध्वस्तपापौघाः सुखिनः स्म कृपानिधे ॥
इति स्तुत्वा तु ते व्यासं पाराशर्यं मुनीश्वरम् ।
तल्लब्धपञ्चसंस्काराः स्वाश्रमाणि पुनर्ययुः ॥

Colophon:—

इति व्यासस्मृतावुत्तरखण्डे तृतीयोऽध्यायः ॥

Subject:—

This is professedly a Śrīvaiṣṇava work in three chapters and describes the duties enjoined on a Śrīvaiṣṇava, specially according to the Southern or Tenkalai school and such peculiar views as that women are privileged to learn and repeat the Aṣṭākṣari with the Praṇava, that the ringing of bells should be avoided at the time of worship of God in private houses, that bowing to Ācāryas, etc. should be only once, and that Vaiśvadeva, Mahālaya, etc., are only Kāmya Karmas and that a true Vaiṣṇava need not perform them.

प्रतिपाद्यविषयः—

अत्रादितो वैष्णवत्वप्रशंसनावैष्णवत्वनिन्दनपूर्वकं वैष्णवानां पञ्चसंस्कारावश्यकत्वं वैष्णवीयगृहपात्रादिष्वप्यूर्ध्वपुण्ड्रशङ्खचक्राङ्कनावश्यकतां चोपवर्ण्य दक्षिणकलासंप्रदायक्रमेणोर्ध्वपुण्ड्रधारणक्रममुपपाद्य स्त्रीणामपि सप्रणवाष्टाक्षरादिमन्त्रोपदेशतज्जपादिविधानादिकमभिधीयते ॥

द्वितीयेऽध्याये—विष्ण्वाराधनक्रमनिरूपणप्रसङ्गेन नैमित्तिकाराधनरूप—वामनजयन्ती—श्रीनरसिंहजयन्ती—रामजयन्ती—कृष्णजयन्ती कृत्तिकादीपोत्सवादिकालादिकमभिधाय रात्रावुत्सवान्तसम्भवे तदैव प्रत्याब्दिकश्राद्धानामप्याचरणीयत्वं प्रकाश्य गृहार्चाविधौ घण्टानादं निराकृत्य भगवद्वन्दनस्य सकृद्वारतामुक्त्वा असकृत्त्वमप्यनुमत्य वैश्वदेवाग्न्याधानमहालयश्राद्धादीनां काम्यत्वाभिधानपूर्वकं तदाचरणं निषिध्य भागवताराधनावश्यकत्वं चोपपादितं दृश्यते ॥

तृतीयेऽध्याये—पतिवत्नीनां वैष्णवस्त्रीणां धर्मानभिधाय तासां कर्तव्यजातं संगृह्य विधवानां मुण्डनं निषिध्य तत्कर्तव्यकलापोऽपि संगृहीतो दृश्यते ॥

Noteworthy Features.—This is stated to be the Uttarakhāṇḍa of Vyāsa Smṛti. It is a matter for investigation whether it really forms part of the Vyāsa Smṛiti and whether the Purvakhāṇḍa exists any where.

वक्तव्यविशेषः—

कोशेऽस्मिन् दृश्यमानायां स्मृतौ. विना प्रथममध्यायं त्रयोऽध्याया उपलभ्यन्ते । तत्रादौ चतुर्थोऽध्यायः, ततः द्वितीयोऽध्यायः, ततश्च तृतीयोऽध्यायो लिखितो दृश्यते । वस्तुतो ग्रन्थपर्यालोचनायां चतुर्थाध्यायत्वेन निर्दिष्टाऽध्याय एवोपोद्घातदर्शनाल्लेखकप्रमादेन प्रथमाध्याय इति निर्देष्टव्यश्चतुर्थाध्यायतया निर्दिष्टः स्यादिति ज्ञायते ॥

कोशेऽस्मिन् दृश्यमानो ग्रन्थभागः व्यासस्मृतौ उत्तरखण्डरूपतया निर्दिष्टो मुद्रितव्यासस्मृतिकोशेषु अत्रत्यतत्कोशान्तरेषु चानुपलभ्यमानः श्रीवैष्णवेषु बहुशो दक्षिणकलासम्प्रदायानुरोध्याचरणजातप्रदर्शनपरो दृश्यते । अस्य चात्र व्यासस्मृतावुत्तरखण्डतया निर्देशादेतत्पूर्वखण्डः कुत्रोपलभ्यत इति गवेषणीयम् ॥

किं चात्र दृश्यमानं श्रीनृसिंहजयन्तीकृष्णजयन्त्यो रात्रावपि प्रत्याब्दिकश्राद्धविधानं कस्मिन् सम्प्रदाये दृश्यत इत्यपि चिन्तनीयम् ॥

No. 146 (A 136/3).

शङ्खलिखितस्मृतिः.

Śankha Likhita Smṛtiḥ.

Author— Śankha Likhita.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—34-36.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

वासुदेवं नमस्कृत्य शङ्खस्य लिखितस्य च ।
धर्मशास्त्रं प्रवक्ष्यामि दधन्येव घृतं यथा ॥

वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः ।
सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥

अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजातयः ।
वृथा ते तेन पाकेन शुनां योनौ प्रजायते ॥ २२ ॥

End:—

अग्निदग्धं प्ररोहेत सूर्यदग्धं तथैव च ।
दण्ड्यस्तु संप्ररोहेत ब्रह्मशापहतो हतः ॥

तस्मात्ते ब्राह्मणा वन्द्याः पूजनीयाः प्रयत्नतः ।
पालनीया नरेन्द्रेण सर्वथा सर्वयत्नतः ॥

Colophon:—

इति शङ्खलिखितस्मृतिस्समाप्ता ॥

Subject:—

The topics dealt with in this Smṛti are: (1) It is binding on the householder to perform the Vaiśvadeva and to entertain the guest. (2) The King should protect the Brahmin. (3) Eulogy of the King and the Brahmin.

प्रतिपाद्यविषयः—

अत्र वैश्वदेवातिथेययोरवश्यकार्यत्वं, पराब्भजीवननिषेधः, राज्ञो ब्राह्मणपरिपालनस्यावश्यकत्वं, राजप्रशंसा, ब्राह्मणप्रशंसनं चेत्येतानि निरूप्यन्ते ॥

Noteworthy Features.—It is complete and is printed in the Ānandāśrama Series, at the Venkatesvara Press, Bombay, and with a Telugu Tika in Madras.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिस्समग्रा दृश्यते। आनन्दाश्रमे वेङ्कटेश्वर-मुद्रालये चेयं मुद्रिता दृश्यते ॥

No. 147 (A 669/2).

शङ्खलिखितस्मृतिः

Śankha Likhita Smṛtiḥ.

Author—Śankha Likhita
Substance—Paper.
Size—$13 \times 8\frac{3}{8}$ inches.
Character—Telugu.
Folios—6th only.
Lines on a page—26.
Letters in a line—25.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

No. 148 (4064/1).

शाण्डिल्यस्मृतिः.

Śāṇḍilya Smṛtiḥ.

Author—Sage Śāṇḍilya.
Substance—Palm-leaf.
Size—$8\frac{1}{8}\times2\frac{1}{4}$ inches.
Character—Grantha.
Folios—20–51.
Lines on a page—12.
Letters in a line—32.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

श्रीमत्तोतगिरेर्मूर्ध्नि श्रीमत्यायतने हरेः ।
शाण्डिल्यमृषिमासीनं प्रणम्य मुनयोऽब्रुवन् ।
श्रीमदेकायनं शास्त्रं श्रुतं गुह्यं सनातनम् ।
ज्ञातं च सर्ववेदानामन्तस्सारमिदं त्विति ॥
निवृत्तं वैदिकं कर्म यत्प्रोक्तं भवभेषजम् ।
पञ्चकालात्मकं ज्ञानं तच्च ब्रह्मैकदेवतम् ।
कुटुम्बाश्रमनिष्ठानां पञ्चकालनिषेविणाम् ।
आचारं त्वन्मुखाम्भोजाच्छ्रोतुमिच्छामहे वयम् ॥
शाण्डिल्योऽपि नमस्कृत्य मङ्गलायतनं हरिम् ।
अब्रवीत्स मुनिश्रेष्ठान् श्रेष्ठकर्मा महामुनिः ॥

End:—

इदं सदागमाख्यं तु वेदशास्त्रमितीरितम् ।
इति संक्षेपतः प्रोक्तस्सदाचारो यथागमम् ॥
तथा शास्त्रस्य माहात्म्यं विशेषश्चैकयाजिनाम् ।
इदं शास्त्रमधीयानो ब्राह्मणो भगवत्परः ।
श्रियं यशश्च विपुलं परमायुरवाप्नुयात् ॥

Colophon:—

इति शाण्डिल्यधर्मशास्त्रे पञ्चमोऽध्यायः ॥

Subject :—

This is a work in five chapters describing in detail the duties that a devotee of Viṣṇu should perform in the five periods of the day.

प्रतिपाद्यविषयः—

वैष्णवानां पाञ्चकालिकधर्मावबोधिनीयं पञ्चाध्यायीपरिमिता स्मृतिः। तत्र प्रथमेऽध्याये—आचारलक्षणं, पञ्चानां श्रोत्रत्वग्दृग्जिह्वाघ्राणानामिन्द्रियाणां शुद्धिः, पाणिपादादिकर्मेन्द्रियाणां बुद्धेर्मनसश्च शुद्धिः, द्रव्यशुद्धिः, सात्विकादिद्रव्याणि, देशशुद्धिः, कर्मशुद्धिः भगवद्भक्तसेवामहिमा, शिष्यान् परीक्ष्य ब्रह्मविद्याप्रदानं, शिष्यलक्षणं, सहवासार्हाः, गार्हस्थ्यप्रशंसनं, इत्येतानि प्रतिपाद्यन्ते ॥

द्वितीये—प्रातर्भगवन्नामादिकीर्तनं, मलमूत्रोत्सर्गविधिः, शौचविधिः, दन्तधावनं, स्नानविधिः, स्नाननिमित्तानि, कालविशेषे स्नाननिषेधः, संध्यादिकर्म, अभिगमनं, अष्टाङ्गप्रणामलक्षणं, भगवदालये नियमाः, तत्र मन्त्रजपः, औपासनमित्येतानि निरूप्यन्ते प्रथमकालकर्तव्यानि ॥

तृतीये—भगवदाराधनार्हद्रव्योपादानं, अप्रतिग्राह्यद्रव्याणि, गृहिणीधर्मा गृहोपकरणशुद्धिकरणादयः, पक्षादूर्ध्वं मृद्भाण्डस्य पचनक्रियानर्हत्वं, मासादूर्ध्वं घृतादीनामग्राह्यत्वं, पाकार्हशाकादयः, भक्ष्याभक्ष्याणि, भगवदालयालङ्करणादीनि गृहिणीकर्माणि, स्त्रीभृत्यादीनामात्मानुकूलतापादनं, इत्यादीनि प्रतिपाद्यन्ते ॥

चतुर्थे—भगवदाराधनविधिः, अतिथिसत्कारः, स्वार्थोऽनिवेदितस्य अभोज्यत्वं, भोजननियमाः, अन्ये च गृहस्थोपयोगिनो धर्माः, शास्त्राभ्यासशिष्यशिक्षणादि, इत्येतानि निरूप्यन्ते ॥

पञ्चमे—सायंसंध्यादि, योगः, पत्न्युपगमः, पत्न्यामत्यासक्तिवर्जनं, भगवद्ध्यानं, स्वप्नकथनार्हाः, निद्रायोग्यकालः, चतुर्थकाले योगविधिः, द्वादशाक्षरविद्यया योगविधिः, एवं पाञ्चकालिकधर्मनिरतानामेतच्छास्त्राध्यायिनां फलं चेत्येतानि सुललितया शैल्या प्रतिपाद्यन्ते ॥

Noteworthy Features.—It is complete and is printed in Madras with a Telugu commentary.

वक्तव्यविशेषः—

कोशेऽस्मिन्नियं स्मृतिस्समग्रा दृश्यते । मद्रपुर्यामान्ध्रटीकया साकं मुद्रिता चोपलभ्यते ॥

No. 149 (4487/7).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author—Śātātapa.
Substance—Palm-leaf.
Size—10 × 2 inches.
Character—Nāgari.
Folios—38-46.
Lines on a page—10.
Letters in a line—46.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Incorrect.
Complete or incomplete—Incomplete.
Acquired or transcribed—Acquired.

Beginning:—

अथातश्शातातपधर्मं व्याख्यास्यामो ब्राह्मणो ब्राह्मणं हत्वा शिरःकपालमादाय तीर्थात्तीर्थान्यनुचरेत् । आत्मनः पापसङ्कीर्तनं कृत्वा द्वादशवर्षात्पूतो भवति । अथवा अश्वमेधं गच्छति । तस्य दर्शनात्पूतो भवति ॥

ब्राह्मणस्तु सुरापस्स्यात् कथञ्चित्काममोहितः ।
अग्निवर्णां सुरां पीत्वा मृतश्शुद्धिमवाप्नुयात् ॥
अपहृत्य सुवर्णं तु ब्राह्मणस्य तु तत्स्वयम् ।
गच्छेन्मुसलमादाय राजानं स वधाय तु ॥
हतश्शुद्धिमवाप्नोति राज्ञाऽसौ मुक्त एव वा ॥

End:—

तर्पणं तु शुचिः कुर्यात् प्रत्यहं तां तु कस्त्विति ।
देवेभ्योऽथ ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥
अग्निकार्यं तु कुर्वीत वाग्यतो नान्यमानसः ।
भूतयज्ञं तथा श्राद्धं नित्यं त्वतिथितर्पणम् ॥

इति शातातपधर्मशास्त्रे आचारकथनं नाम द्वादशोऽध्यायः ॥

Colophon:—

इति शातातपधर्मशास्त्रं समाप्तम् ॥

Subject:—

It treats of, in twelve chapters, the prāyascittas for the Mahāpātakas and the upapātakas, Vaiśvadēva,

Śrāddha, prāyaścitta for dogbites, etc. impurity on birth and death, rules of conduct, etc.

प्रतिपाद्यविषयः—

कोशेऽस्मिन्नुपलभ्यमानायां स्मृतौ द्वादशाध्यायाः परिदृश्यन्ते— तत्र प्रथमे—ब्रह्महत्यादिमहापातकप्रायश्चित्तम्, द्वितीये अवकीर्णिप्रायश्चित्तम्, तृतीये—उपपातकप्रायश्चित्तम्, तुरीये—अग्न्युदकादौ मूत्रपुरीषोत्सर्गादिषु प्रायश्चित्तम्, पञ्चमे—वृथापाकपरिवेत्तृत्वादिप्रायश्चित्तम्, षष्ठे—अतिथिपूजनादिकं, सप्तमाष्टमयोः—नित्यनैमित्तिकादिश्राद्धविधानम्, नवमे—वैश्वदेवपञ्चमहायज्ञविधानम्, दशमे—श्वभिर्दंशादौ व्रणे क्रिमिसम्भवादौ च शुद्धिः, एकादशे—आशौचसङ्ग्रहः, द्वादशे—अब्राह्मण्यापादकनिमित्तषट्कनिरूपणपूर्वकं स्नानदेवर्षिपितृतर्पणाद्याचाराः संगृह्यन्ते ॥

Noteworthy Features.—This is completely in agreement with the Śātātapa Smṛti published in Madras in Telugu characters with a Telugu commentary and differs from that published in Calcutta, Bombay and Poona.

वक्तव्यविशेषः—

कोशेऽस्मिन्निय्यं स्मृतिः कलकत्तामोहमयीपूनानगरेषु मुद्रितशातातपस्मृतिविलक्षणा दृश्यते। No. 150 कोश मध्ये अनुपलभ्यमानं नित्यनैमित्तिकश्राद्धादिविधानपरं 'नानिष्ट्वा तु' 'दर्शश्राद्धं' इत्यादिकमध्यायद्वयमत्र सप्तमाष्टमाध्यायात्मना दृश्यत इत्येतत्कोशालयोपलभ्यमानैतत्स्मृतिकोशान्तरापेक्षयाऽऽधिको ग्रन्थभाग उपलभ्यते। इयं स्मृतिः मद्रनगरे आन्ध्रलिप्यां आन्ध्रटीकासमेता मुद्रितोपलभ्यते ॥

No. 150 (3798/3).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author Sage—*Śātātapa*	Size—15⅞ × 1⅜ inches.
Substance—Palm-leaf.	Character—Grantha.

Folios—16–23.
Lines on a page—8.
Letters in a line—48.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

As in No. 149

End:—

अग्निकार्यं तु कुर्वीत वाग्यतो नान्यमानसः।
भूतयज्ञं तथा नित्यं श्राद्धं चातिथितर्पणम्॥
क्रमेण तेन कर्तव्यं स्वाध्यायाध्ययनं तथा।
वर्जयेत्प्रतिषिद्धानि विहितानि समाचरेत्॥
इति धर्मस्समाख्यातो वर्णाश्रमरतस्सदा।
अविरुद्धमिमं धर्मं कुर्वन् सिद्धिमवाप्नुयात्॥
दुरितानां च दुष्टानां पापानां च महत्तथा।
धर्ममेतदधीयित मुच्यते नात्र संशयः॥

Colophon:—

इति शातातपधर्मशास्त्रे द्वादशोऽध्यायः॥

Subject:—

As. in No. 149.

Noteworthy Features.—This is only another copy of No. 149. The chapters are wrongly numbered and there are at the end, three verses which are not found in No. 149.

वक्तव्यविशेषः—

No. 149 कोशे नवमाध्यायतया दृश्यमानोऽत्र सप्तमाष्टमाध्यायद्वयात्मना दृश्यते। तथा तत्रैव सप्तमाष्टमाध्यायात्मना दृश्यमानोऽत्र नवमदशमाध्यायरूपतया दृश्यते। तथा तत्रैव एकादशद्वादशाध्यायद्वयात्मना दृश्यमानोऽत्र द्वादशरूपैकाध्यायतया दृश्यते इत्ययमध्यायसंख्यावैलक्षण्यं क्वचित्क्वचित्किञ्चित्पाठभेदः, अन्ते श्लोकत्रितयं चाधिकं दृश्यते॥

No. 151 (A 136/2).

शातातपस्मृति.

Śātātapa Smṛtiḥ.

Author Sage—Śātātapa.
Substance—Paper.
Size—$12\frac{3}{4} \times 8$ inches.
Character—Telugu.
Folios—29–34.
Lines on a page—20.
Letters in a line—16.
Age of MS—Old.

Condition of MS—Good.
Correct or incorrect—
Not quite correct.
Complete or incomplete—
Incomplete.
Acquired or transcribed—
Acquired.

Beginning:—

As in No. 149.

End:—

सुवासिन्यां मृतायां तु ब्राह्मणैस्सह भोजनम् ।
सुवासिन्याः प्रदातव्यमिति शातातपोऽब्रवीत् ।
नियमोऽयं सुवासिन्या पत्नान्या या न विद्यते ।
अकृते नाह्निके चैवं न तृप्तिरिति वै जगुः ॥
प्रभवन्त्यत्र तस्यास्तु महान्तो ब्रह्मवादिनः ॥

Colophon:—

इति शातातपधर्मशास्त्रे सप्तमोऽध्यायः ॥

Subject:—

As in No. 149.

Noteworthy Features.—This is an incomplete copy containing only seven chapters of the work. The four additional verses found in other copies at the end of the twelfth chapter are found at the end of the seventh.

वक्तव्यविशेषः—

कोशेऽस्मिन् सप्ताध्याया एव दृश्यन्ते । No. 149 कोशे तु द्वादशाध्यायानामुपलम्भादेतत्कोशे सप्तमाध्यायान्त एव एतत्स्मृतिसमग्रता-

लेखनं प्रामादिकमिति मन्तव्यम् । अत्र सप्तमाध्यायान्ते No. 149 कोशे दृश्यमानग्रन्थापेक्षया श्लोकचतुष्टयमात्रमधिकं दृश्यते। तच्च कोशान्तरेषु द्वादशाध्यायान्ते परिदृश्यते ॥

No. 152 (A 669/1).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author—Sage Śātātapa.	Condition of MS—Good.
Substance—Paper.	Correct or incorrect—Incorrect.
Size—13 × 8⅝ inches.	Complete or incomplete—Incomplete.
Character—Telugu.	Acquired or transcribed—Acquired.
Folios—1-4.	
Lines on a page—25.	
Letters in a line—24.	
Age of MS—Old.	

Beginning, etc., as in No. 151.

No. 153 (1656/3).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author—Sage Śātātapa.	Condition of MS—Good.
Substance—Palm-leaf.	Correct or incorrect—Not quite correct.
Size—10 × 1⅝ inches.	Complete or incomplete—Complete.
Character—Telugu.	Acquired or transcribed—Acquired.
Folios—53-57.	
Lines on a page—11.	
Letters in a line—40.	
Age of MS—Old.	

Beginning:—

अथ शातातपधर्मं व्याख्यास्यामो ब्राह्मणो ब्राह्मणं हत्वा तस्य शिरःकपालमादाय तीर्थान्यनुसञ्चरेत् । आत्मनः पापसंकीर्तनं कृत्वा द्वादशवर्षे पूतो भवति । अथाश्वमेधेन यक्ष्य इति तस्य यजमानात्पूतो भवति ॥

इत्यादि No. 149 कोशवत्।

End:—

भूतयज्ञं तथा नित्यं श्राद्धं चातिथितर्पणम् ।
क्रमेण तेन कर्तव्यं स्वाध्यायाध्ययनं तथा ॥
वर्जयेत्प्रतिषिद्धानि विहितानि समाचरेत् ।
इति धर्मस्समाख्यातो वर्णाश्रमरतिस्सदा ॥
अविरुद्धमिमं धर्मं कुर्वन् सिद्धिमवाप्नुयात् ।
दुरितानां च दुष्टानां पापानां च महत्तथा ॥
धर्ममेतद्धारयीत ? मुच्यते नात्र संशयः ।

Colophon:—

इति शातातपधर्मशास्त्रे द्वादशोऽध्यायः ॥

Subject:—

As in No. 149.

Noteworthy Features.—This is also an incomplete copy. Chapters 7 and 8 are missing and the contents of chapter 12 in No. 149 are divided and numbered as chapters 10, 11 and 12.

वक्तव्यविशेषः—

मुद्रितशातातपस्मृत्यपेक्षया विलक्षणेयं स्मृतिः । No. 149 कोश-दृश्यमानाध्यायविभागविलक्षणा तत्रत्याध्यायद्वयन्यूना चास्मिन् कोशे दृश्यते । No. 149 कोशे सप्तमाष्टमाध्यायरूपतया दृश्यमानं 'नानिष्ट्वा तु पितॄन्' 'दर्शश्राद्धं' इत्यादिकं नित्यनैमित्तिकश्राद्धप्रतिपादनपरम-ध्यायद्वयमत्र कोशे न दृश्यते । तत्रैव द्वादशाध्यायतया दृश्यमानो ग्रन्थः अत्र दशमैकादशद्वादशरूपाध्यायत्रितयात्मना परिदृश्यत इति ॥

No. 154 (2852/8).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author—Sage Śātātapa.
Substance—Palm-leaf.
Size—$19\frac{1}{2} \times 1\frac{3}{4}$ inches.
Character—Grantha.
Folios—195-198.
Lines on a page—9.
Letters in a line—60.
Age of MS—Old.
Condition of MS—Not good.
Correct or incorrect—Not so incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc., as in No. 153.

No. 155 (3154/13).

शातातपस्मृतिः.

Śātātapa Smṛtiḥ.

Author—Sage Śātātapa.
Substance—Palm-leaf.
Size—$10 \times 1\frac{5}{8}$ inches.
Character—Grantha.
Folios—117-124.
Lines on a page—7.
Letters in a line—48.
Age of MS—Old.
Condition of MS—Not good, wormed.
Correct or incorrect—incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 153.

No. 156 (3534/7)

शातातपस्मृतिः.

Śātātapa Smṛitiḥ.

Author--Sage Śātātapa.
Substance—Palm-leaf.
Size—$15\frac{3}{4} \times 1\frac{1}{2}$ inches.
Character—Grantha.

Folios—255-264.
Lines on a page—7.
Letters in a line—40.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Not quite correct.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning, etc.—As in No. 153.

वक्तव्यविशेषः—

No. 153 कोशापेक्षयाऽत्र अध्यायसङ्ख्यालेखनव्यत्ययमात्रं दृश्यते। शेषं सर्वं तद्वदेव दृश्यते ॥

No. 157 (3155/1).

शिवधर्मशास्त्रम्.

Śivadharma Śāstram.

Author—Nandikeśvara.
Substance—Palm-leaf.
Size—14⅖ × 1½ inches.
Character—Grantha.
Folios—1-63.
Lines on a page—8.
Letters in a line—48.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—incorrect.
Complete or incomplete—Complete.
Acquired or transcribed—Acquired.

Beginning:—

(सर्वाकारमशेषस्य जगतस्सर्वदा शिवम्।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥
शिवमादौ शिवं मध्ये शिवमन्ते च सर्वदा।
सर्वेषां शिवभक्तानामनुगानां च नश्शिवम् ॥)
मेरुपृष्ठे सुखासीनमृषिसङ्घैस्समावृतम्।
लोकानुग्राहकं शान्तं सर्वज्ञं नन्दिकेश्वरम् ॥
तेषां मध्ये समुत्थाय ऋषिर्ब्रह्मसुतोत्तमः।

सनत्कुमारः—

भगवन् सर्वधर्मज्ञ शिवधर्मपरायण ।
श्रोतुकामाः परं धर्ममिमं सर्वे समागताः ॥

End:—

इति स्तवेन शुद्धेन यस्स्तौति परमेश्वरम् ।
स मुक्तस्सर्वपापेभ्यश्शिवसायुज्यमाप्नुयात् ॥
सर्वस्तरति दुर्गाणि सर्वभद्राणि पश्यति ।
सर्वस्स्वां गतिमाप्नोति सर्वस्य तु भवेच्छिवम् ॥

ओं शर्वाय क्षितिमूर्तये नमः। ओं रुद्रायाग्निमूर्तये नमः। ओं पशुपतये यजमानमूर्तये नमः। ओं भवाय जलमूर्तये नमः। ओं उग्राय वायुमूर्तये नमः। ओं महादेवाय चन्द्रमूर्तये नमः। ओं भीमायाकाशमूर्तये नमः। ओं भर्गाय सूर्यमूर्तये नमः ॥

मूर्तयोऽष्टौ शिवस्योक्ताः पूर्वादिक्रमयोगतः ।
ईशानान्ताः प्रयोज्यास्स्युस्ताभ्यः पूजाङ्ग (शिवाङ्ग) पूजनम् ॥
इति शिवधर्मशास्त्रे नन्दिकेश्वरप्रोक्ते द्वादशोऽध्यायः ॥

Snbject:—

This is a Dharmaśāstra ascribed to Nandikēśvara. It details the duties of a true devotee of Śiva and contains the eulogy of Śivabhakti and the mode of worship of the Linga.

प्रतिपाद्यविषयः—

